This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

M-428

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र. M 428 विषय पुराण
नाव. मल्हारी महात्म्य (मुद्रित)
लेखक/लिपीकार —
पृष्ठ 40 काळ इ.स. 1969 पूर्ण/~~अपूर्ण~~

Checked 2012

M-428

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ

# ॥ म ल्हा री मा हा त्म्य ॥

प्रारंभ

Kulkarni

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः ॥ वाग्वल्लीपल्लवोल्लोलसरागकरभासुरम् ॥ गजास्यंसुंदरंवंदे वृंदारकगणार्चि
तम् ॥१॥ विघ्नेशचरणांभोजमकरंदोदबिंदवः ॥ सिंचंतुभारतींवल्लींनतानांवरदालये ॥२॥
कैलासाचलचूडाग्रेमणिसुंदरमंदिरे ॥ पपृच्छपार्वतीकांतंरहस्यानंदसुंदरम् ॥३॥ प्रियंकिंदुर्ल
भंलोकेकिमाश्चर्यकरंपरम् ॥ क्षेत्रंतीर्थंसदानृणांभुक्तिमुक्तिफलप्रदम् ॥४॥ अवतारेणकेनत्वंस
र्वेषांसुलभः सदा ॥ कैर्व्रतैस्त्वंसमाराध्यःकथयाशुममप्रभो ॥५॥ श्रीशिव उवाच ॥ पुराकृतयुगे
कालेभ्रष्टवीर्यान्मुनीश्वरान् ॥ सनत्कुमारोकथयद्दुःखदारिद्र्यपीडितान् ॥६॥ तत्क्षेत्रंतीर्थमप्येकं
भुक्तिमुक्तिप्रदंशिवम् ॥ अधिष्ठितंमयादेवित्वयाचकृपयानृणाम् ॥७॥ तद्वक्ष्यामिमहादेविप्रेम्णा
तववरानने ॥ सनत्कुमारउवाच ॥ पुराधर्मसुताःसप्तमणिचूलंगिरिंगताः ॥८॥ तपस्तेपुस्तदाती
व्रमेकाग्रहृदयस्थिताः ॥ शांतादांताःसदाचाराःसदाराःसपरिग्रहाः ॥९॥ आश्रमेरमणीयेऽस्मि
न्वृक्षवल्लीजलाकुले ॥ शांतवैरमृगव्याघ्रबभ्रूरगसमाकुले ॥१०॥ सर्वर्तुफलसंपूर्णेकदलीखंडमं
डिते ॥ रसालसरलोल्लोलतरुणारुणपल्लवे ॥११॥ सुच्छायशीतलोपांतेमयूरावलिकूजिते ॥ क
दाचित्तत्रमल्लाख्योदैत्यराजःसमागतः ॥१२॥ ज्वालाकरालवदनोराक्षसैःपरिवारितः ॥ उदग्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

करवालाग्रधाराछिन्नमहीरुहः ॥१३॥ पदातिरथनागाश्वघोषव्याकुलितामरः ॥ लोहसन्नाह किरणोन्मिश्रितार्कांशुमंडलः ॥१४॥ आश्रमास्तेनविध्वस्ताः समस्ताअपिविस्तृताः॥आक्रां तास्तरवस्तुंगाःसामरैःकुंजरैःकरैः ॥१५॥ लोललांगूलचरणैर्घटीयंत्रावलिर्हता ॥ कुंडस्थाब र्हिषस्तत्रतस्यपुत्रैर्निषेचिताः ॥१६॥ विदार्यदेवतार्चायाःकुसुमानिमहीरुहाम् ॥ पूजावेदिषुर म्यासुपानकेलीश्चकारसः ॥१७॥ जहौतदाश्रमपदंसौंदर्यंदुःखतोनिजम् ॥ मुखंसद्योविशस्ता यास्तरुण्याइवतत्क्षणात् ॥ १८ ॥ निपेतुःशाखिनांशाखा यत्रकीर्णामहीतले ॥ वेदानामिव शंखेनग्रस्तानांशतशःकृताः ॥ १९ ॥ बटवः पटवोध्यायन्स्फूर्जितर्जनतर्जिताः ॥ हताःकाम दुघागावोयज्ञियाःपीवरोधसः ॥ २० ॥ व्याकुलीकारयामासशांतादांताःपतिव्रताः ॥ ऋषयः कंठपाशाद्यैर्बध्वावापीषुमज्जिताः ॥ २१ ॥ इतिदुःखाभिभूतास्तेगतेतस्मिन्दुरात्मनि ॥ किंकुर्मःक्वचगच्छामःक्वसामःसुदुःखिताः ॥२२॥ कंविभुंकथयिष्यामोविभुः कः पालयिष्य ति ॥ कृतमस्माभिरतुलंदुष्कृतंतन्नविद्महे ॥ २३ ॥ कष्टंकष्टमहोत्रातानास्त्यनाथावयंबत ॥ यंनालंजेतुमिंद्रोपिकथंजेष्यंतितंनृपाः ॥ २४ ॥ शपामश्चेद्दुरात्मानंतपोहानिर्भविष्यति ॥

जजल्पुरितितेसर्वेभयविह्वलचेतसः ॥ २५ ॥ वृत्तांतमेनंदेवेशंनारायणमथाब्जजम् ॥ किं वामहेशंसर्वेशंकथयामः सुदुःखिताः ॥ २६ ॥ अस्तिगूढतमंकिंचित्स्थानंयत्पर्वतांतरे ॥ कुटुंबान्यग्निहोत्राणिनेष्यामस्तत्रकिंवयम् ॥२७॥ इतिश्रीब्रह्मांडपुराणेक्षेत्रखंडेमल्लारिमाहा त्म्येआश्रमपीडनंनामप्रथमोऽध्यायः ॥ १ ॥ ॥ सनत्कुमार उवाच ॥ अथते मुनयःसर्वेदूनचित्ताः सुदुःखिताः ॥ गोपाय्यचकुटुंबानिकस्मिंश्चित्पर्वतांतरे ॥ १ ॥ ययुःसहस्रनयननगरीममरावतीम् ॥ सुधर्मायांसभायांतमासीनंददृशुःक्षणात् ॥ २ ॥ ज्वलद्रत्नावलिप्रांशुतेजोज्वालासुशोभिते ॥ सिंहासनेवीज्यमानंचामरैर्हरिणीदृशाम् ॥ ॥ ३ ॥ यमग्निःसेवतेनित्यंदाहकर्मविहायच ॥ मूर्त्यासुंदरयारम्यपुञ्जवच्छान्ततेजसा ॥ ॥ ४ ॥ सरोषंकर्ममुक्त्वावायमोभूत्वाकृतांजलिः ॥ त्यक्त्वासराक्षसींवृत्तिमुपास्तेनैर्ऋतः स्वयम् ॥ ५ ॥ पाशभृत्पुरतःस्तिष्ठन्वरुणः किंकराकृतिः ॥ वायुर्मूर्तिधरःशांतःप्रांजलिः परिसेवते ॥ ६ ॥ निधिहस्तः सदाराजराजस्तिष्ठतितत्पुरः ॥ रम्यमूर्तिधरः श्रीमानुपा स्तेऽसौदिवाकरः ॥ ७ ॥ भजतेसर्वभावेनदेवः कुमुदबांधवः ॥ संतोषयतिदेवानामाचार्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्चारुवर्णनैः ॥ ८ ॥ गायंतिललितंगीतंगंधर्वाःसुमनोहरम् ॥ सिद्धचारणनागाद्यानिज
विद्याभिरावृताः ॥ ९ ॥ अतोषयन्स्वभावेनभक्त्यासंपूर्णयापृथक् ॥ कांतारंभादयोनित्यंल
लितैर्यमुपासते ॥ १० ॥ तत्रागतान्समालोक्यधर्मपुत्रान्मुनीश्वरान् ॥ सिंहासनात्समुत्था
यभक्तिपूर्वंननामसः ॥ ११ ॥ शक्र उवाच ॥ पूर्वंपूर्वंमयायच्चजन्मजन्मांतरादपि ॥ उ
पार्जितंमहत्पुण्यंफलितंदर्शनेनवः ॥ १२ ॥ अस्मासुकृतपुण्यानांमहतीभवतांकृपा ॥ स्वय
मुत्कंठितायूयंप्रीत्यायत्स्वयमागताः ॥ १३ ॥ धन्योस्मिकृतपुण्योस्मिकृतकृत्योस्मिसर्व
था ॥ सत्यंस्वर्गाधिपत्यंमेभवतामद्यदर्शनात् ॥ १४ ॥ अद्यप्रभृतिनिर्विघ्नंममकार्यंभवि
ष्यति ॥ निर्विघ्नकरणायूयंगणेशाइवनिष्कराः ॥ १५ ॥ आदिशध्वंयथाकार्यंकेनयूयंसु
दुःखिताः ॥ श्रांताःक्लांताःपथायासादतिम्लानमुखश्रियः ॥ १६ ॥ ऋषय ऊचुः ॥
हर्ताकर्तास्वयंशास्ताभवांस्त्रिजगतांविभुः ॥ तपःस्वमनुतिष्ठामोभवद्दत्ताभयोत्सवैः ॥ १७ ॥
कदाचिन्मृगयाव्याजाद्राक्षसैःपरिवारितः ॥ आजगामाश्रमान्नोसौमल्लोकारिमहाव्यथाम्
॥ १८ ॥ वयंसंत्रासितास्तेनजीवशेषाइवस्थिताः ॥ अतीतानागतज्ञानाद्देवोजानातिवर्तनम्

॥ २ ॥

॥ १९ ॥ किंब्रूमःकष्टमतुलामास्तांतौमणिमल्लकौ ॥ दुष्टौसुरेंद्रहंतव्यौदेवेनश्रीमतात्वया
॥ २० ॥ शक्र उवाच ॥ ताभ्यांतुमणिमल्लाभ्यामब्जयोनिःसुतोषितः ॥ एकांगुष्ठेनतपसा
धूम्रपानक्रियाविधेः॥२१॥नाहंतयोर्वधार्थायसमर्थोब्राह्मणोत्तमाः॥पराक्रमदुराधर्षौतपोवीर्यम
दोद्धतौ ॥ २२ ॥ विनेश्वरमजेयौतौदुष्टौदुष्टबलोत्कटौ ॥ प्रयातयूयंवैकुंठंविभुर्नारायणः
स्वयम् ॥ २३ ॥ इत्थंकदर्थितान्दृष्ट्वाभवतःक्षांततेजसः ॥ सपक्षपाताद्विप्राणांदानवान्हं
तुमर्हति ॥ २४ ॥ शश्वन्नियोगीतस्याहंसविष्णुर्जगतांपतिः ॥ कर्तुंचनैवचाकर्तुमन्यथाक
र्तुमीश्वरः ॥ २५ ॥ सृष्टेःकर्तास्वयंसाक्षात्स्वयंपालयिताविभुः ॥ हर्तासौरुद्ररूपेणतस्मा
न्नास्त्यपरःप्रभुः ॥ २६ ॥ ऋषय ऊचुः ॥ वयंकिंवैभवंविष्णोर्नविद्मोवेदशास्त्रतः ॥ इति
हासपुराणेभ्यआगमेभ्योविशेषतः ॥ २७ ॥ देवोवदतिकिंतस्यवात्सल्यंचपराक्रमम् ॥ अ
स्माकंदैवयोगेनशक्रोप्यक्षमतांगतः ॥ २८ ॥ स्वस्त्यस्तुभवतेशक्रवयंयामोहरेर्गिरिम् ॥
जयशत्रुगणान्सर्वान्पाहिसाधुबुधादिकान् ॥ २९ ॥ इतिश्रीब्रह्मांडपुराणेमल्लारिमाहात्म्येश
क्राभिगमनंनामद्वितीयोऽध्यायः ॥ २ ॥ सनत्कुमार उवाच ॥ अथतेमुनयःसर्वेवैकुंठंगगनाध्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना ॥ ध्यायंतश्चित्तपद्मेषुहृषीकेशंसुरेश्वरम् ॥ १ ॥ तेजसासप्तगुणितंसूर्यमंडलसुंदराः ॥ व्यो
म्नोवतेरुःसहसाविष्णोःप्रासादजाजिरे ॥ २ ॥ ददृशुस्तेसभांरम्यांवैष्णवींयत्रराजते ॥ सिंहास
नसमारूढःपुंडरीकविलोचनः ॥ ३ ॥ नीलोत्पलदलश्यामोनीलमेघघनच्छविः ॥ पीतांबर
कृतोत्तर्यवसनःपुण्यदर्शनः ॥ ४ ॥ चामीकरलसद्दीप्तिः केयूरकटकोज्वलः ॥ चं
डांशुचंडकिरणश्चारुकुंडलमंडितः ॥ ५ ॥ ज्वलद्रत्नप्रभापुञ्जग्रैवेयकविराजितः ॥
गंभीरनाभिविलसत्त्रिवलीललितोदरः ॥ ६ ॥ उल्लसत्स्मेरवदनःसुताम्राधरपल्लवः ॥
आनंदानंदसुखदश्चंदनैकविशेषकः ॥ ७ ॥ स्वर्णयज्ञोपवीतीचसर्वसौंदर्यसागरः ॥ रत्नमा
लोज्ज्वलत्प्रांशुःसुवर्णमुकुटाकृतिः ॥ ८ ॥ नारायणः सुराधीशः क्रतुभोक्ताचतुर्भुजः ॥ बद्ध
पर्यंकचतुरोनिबद्धस्वस्तिकासनः ॥ ९ ॥ कृतांजलिर्वैनतेयः स्वामिनोयस्यसेवकः ॥ आसी
नः पक्षिराजोसौयज्ञागारेध्वजोयथा ॥ १० ॥ शंखचक्रगदापद्मान्यायुधानिसमंततः ॥ मूर्ति
मंतिसदारेजुस्तेजःपुंजाकृतीनिच ॥ ११ ॥ कृपयायेपरेशस्यभक्त्याविष्णोः सनातनः ॥ स्व
रूपमुक्तिभाजस्तेशंखचक्रगदामृतः ॥१२॥ अतसीकुसुमश्यामाः सर्वेकमलधारिणः ॥ पीतां

बरधराः सर्वेवनमालोपशोभिताः ॥ १३ ॥ किरीटकेयूरधरामणिभूषाविराजिताः ॥ विम
लांभोजनयनाः कुंडलैः कर्णभूषणाः ॥१४॥ प्रियायेभक्तवात्सल्याद्दषयोनारदादयः ॥ कपि
लाद्याश्चयेसिद्धायेचान्येसनकादयः ॥१५॥ जगुर्गंधर्वपतयोगीतांचित्ररथादयः ॥ अंगहारैः सु
मधुरैर्ललितैः श्रुतितोषकृत् ॥ १६ ॥ प्रांगणेननृतुः कांतानीलोत्पलदलेक्षणाः ॥ इवकंदर्प
मत्तास्तास्तारुण्यरसनिर्भराः ॥१७॥ चेतांसिव्याकुलीचक्रुर्मुनीनामपिसुंदराः ॥ भ्रमरीवेगतः
स्वांगविकीर्णकनकप्रभाः ॥ १८ ॥ नीलजीमूतसुच्छायेस्वामिसेवकसंकुले ॥ चंचलेवहिरेजु
स्ताः सभागारेनिजत्विषा ॥ १९ ॥ तस्यांसभायांदृष्ट्वैवमुकुंदंसुरपूजितम् ॥ प्रणेमुर्गद्गदगिरः
कंपमानांगयष्टयः ॥२०॥ गात्रस्वेदजलाकीर्णविकीर्णमुखमंडलाः ॥ रोमांचांचितगात्रास्ते
बाष्पपूरितलोचनाः ॥२१॥ निपेतुर्दंडवद्भूमौक्षणमुत्थायतेपुनः ॥ तुष्टुवुः श्रीमहाविष्णुंधर्म
पुत्राः सुसंयताः ॥२२॥ ऋषय उचुः ॥ जयनित्यपरानंदकुंदमंदारजार्चित ॥ जयलक्ष्मीकु
चांभोजराजहंसजगत्पते ॥२३॥ जयनीलोत्पलाभासहासचंद्रांशुशोभन ॥ जयप्रपंचरहितत्रि
लोकीलोकपालक ॥२४॥ जयखंडेंदुसद्भालामितचित्रचरित्रकृत् ॥ जयविश्वेशविश्वात्मन्विश्व



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्गविधायक ॥ २५ ॥ श्रीभगवानुवाच ॥ तुष्टोहमेकभावेनपरिष्वजतमांलघु ॥ संकल्पाइव
चित्तस्ययूयंमेमुनयः सदा ॥ २६ ॥ क्लांताः संत्रासिताः केनहतभाग्येनदुर्मदात् ॥ कृतंकेनत
पोविघ्नंभग्नंवश्चित्तसौख्यकम् ॥ २७ ॥ निरूपयततच्छीघ्रंयेनकुर्मः प्रतिक्रियाम् ॥ ऋषय ऊचुः ॥
शक्रोबिभेतिसमरेयाभ्यांतौमणिमल्लकौ ॥ २८ ॥ यस्यमंत्रीसुराचार्यः सैनिकाअमराः स
दा ॥ क्षीरांभोधिसमुद्भूतोवाहनंश्वेतकुंजरः ॥ २९ ॥ तथैवोच्चैःश्रवास्तस्यतुरंगः सुरसेवितः ॥
दुर्गंस्वर्गः कल्पशाखीभौरिरुः कुसुमायुधः ॥ ३० ॥ संभेदजनकोदूतः परिघायुधमुत्तमम् ॥
ताभ्यांयुद्धेजितः सोऽपिकथनीयंकिमस्तिनः ॥ ३१ ॥ वेत्सिसर्वंत्रिकालज्ञयद्वृत्तंदेवकेशव ॥
नारायण उवाच ॥ विख्यातावसुरौघोरौब्रह्माराधनतत्परौ ॥ ३२ ॥ तपः प्रभावेनतयोरजेयत्वम
भूत्तदा ॥ महेश्वरमृतेतौनोभवेतांमृत्युगोचरौ ॥ ३३ ॥ वयंयूयंचकैलासंगमिष्यामोद्विजोत्तमाः ॥
तत्रविज्ञाप्यतंदैत्यौहन्मस्तौमणिमल्लकौ ॥ नारायणवचः श्रुत्वा ऋषयः शांतिमागताः ॥ ३४ ॥
इति श्रीब्रह्मांडपुराणेमल्लारिमाहात्म्येवैकुंठाभिगमनंनामतृतीयोऽध्यायः ॥ ३ ॥ सनत्कुमार
उवाच ॥ ततस्तेमुनयः सर्वेनभोमार्गानुगामिनः ॥ ददृशुश्चंद्रशुभ्रांशुकैलासंगिरिशालयम् ॥ १ ॥



चंद्रकांतोत्पलैः शुभ्रैः संजातामलशेखरम् ॥ किंवाकर्पूरपूरेणपूरितंधवलोज्ज्वलम् ॥ २ ॥ अथ
वामौक्तिकंचूर्णतेनप्रावरणीकृतम् ॥ अमंदचंदनस्यंदसुस्नातइवनिर्मलम् ॥ ३ ॥ सारिताराज
तीपिष्टिः किंवातस्यामलत्विषः ॥ पीयूषरससंधौतशिखरालिमितोज्ज्वलम् ॥ ४ ॥ यत्रस्वप्रतिबिं
बानिदृष्ट्वागहनकुंजराः ॥ प्रमत्तादंतकुलिशैर्जघ्नुःसानूनिलीलया ॥ ५ ॥ विचेरुस्तुरगास्तुं
गाःकौमुदीमहसोज्ज्वलाः ॥ उपत्यकायामिवतेसमीरामूर्तिधारिणः ॥ ६ ॥ सिद्धामृतस्यकुंडा
निकल्पवल्लीवनाश्रये ॥ कल्पभूरुहशाखाग्रच्छायाच्छन्नानिसर्वतः ॥ ७ ॥ चंद्रकांतशिला
संघबद्धसोपानकाध्वनि ॥ कस्तूरीहरिणाश्चेरुः कर्पूरकदलीवने ॥ ८ ॥ चंचत्कांचनरंभासु
स्वर्णवर्णफलोत्कराः ॥ आचकर्षुः स्वपाकस्यदशयाजगतोदृशः ॥ ९ ॥ घनैः फलैरिवान
म्रामातुलिंग्यःसकंटकाः ॥ बभुर्घनकुचाः कांताःसंभोगपुलकांकिताः ॥ १० ॥ फलोपहारैः
क्रमुकाःप्रयच्छंतीहवर्द्धिताः ॥ सुरवर्त्मनिसूर्यायप्रोन्नतास्तेनताइव ॥ ११ ॥ नागवल्ल्यंचल
व्याप्तानारिकेलाः फलोत्कराः ॥ एलाकंकोलवल्लीनामामोदः प्रसरत्यलम् ॥ १२ ॥ स
दाफलरसालानांपाकवंतिफलानिच ॥ सिंदूररंजितानीवविरेजुः परितोदिशम् ॥ १३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सेविनांतापदलनाभुजंगावलिभूषणाः ॥ शिवाइवशिवोल्लासाविबभुश्चंदनद्रुमाः ॥ १४ ॥ व
नकुंजरकंडूतिकर्मणाभग्नशाखिनाम् ॥ देवदारुतरूणां वै गंधः शैलेससारवै ॥१५॥ तमालतरु
खंडानिजीमूतपटलान्यपि ॥ अविभक्तविवेकानिबभूवुस्तत्रचूलके ॥ १६ ॥ मंदारतरुशा
खाग्रकुसुमानिसुयौवनाः ॥ चिन्वंतिचपलापांग्यः पार्वत्यायत्रसेविकाः ॥ १७ ॥ पार्यातक
परागोत्थपुंजपिंजरितस्तनाः ॥ हरंतिवनपालानांमुनीनांकन्यकामनः ॥ १८ ॥ रामाकटाक्ष
संभग्नः कृष्णचंदनचर्चिताः ॥ इवाबभौचूततरुः प्रफुल्लः षट्पदान्वितः ॥ १९ ॥ उत्फुल्लफलन
म्राणांनिधानानीवतेजसाम् ॥ स्वर्णचंपकवृक्षाणांराजंतेरत्नवेदिकाः ।२०।प्रतिबिंबितचूतानांफ
लौघान्रत्नसानुषु ॥ शुकामोघोद्यमाग्रासेअहोनिर्धारणात्फलम् ॥ २१ ॥ शैवानांशिवपूजासु
निकुंजेषुदिवानिशम् ॥ भवंत्यौषधयोदीपायत्रतैलादिवर्जिताः ॥ २२ ॥ चंद्रकांताश्मशिखरेचं
द्रमंडलवासिनः ॥ चेरुः कुरंग्यःसर्वत्र कुरंगस्यनिजेच्छया ॥२३॥ कांतांगसंगसंजातपुलक
स्तनमंडलाः॥किन्नर्योमरुवृक्षाधः शैवंगायंतिसद्यशः ॥२४॥ गीताकृष्टमृगीणांचलोचनानिस्व
लोचनैः ॥ उन्मेनिरेविनोदाययत्रविद्याधरांगनाः ॥ २५॥ सुपुष्पाणांद्रुमाणांचमंदः परिम



लंवहन् ॥ निर्ववापश्रमवतः पांथान्वासंतिकोमरुत् ॥ २६ ॥ खेलंतिमुष्टिभिः सिद्धबालि
कारत्नसंयुतैः ॥ समासनविभागेनछायेत्रिदशवीरुधाम् ॥ २७ ॥ चक्रिरेसलिलक्रीडांयत्रकिं
पुरुषांगनाः ॥ वापीषुकांतसहिताः स्वर्णसोपानपंक्तिषु ॥ २८ ॥ माणिक्यसानुगेहेषुकांतगं
डस्थलेषुच ॥ रूपंविलोक्यगंधर्वाः स्पृशंतिदशनक्षतम् ॥२९॥ किरातादद्दशुर्मार्गंसिंहानांक
रिमर्दिनाम् ॥ मुक्तावमद्भिरतुलैः पदैः शोणनखांकुरैः ॥ ३० ॥ चंद्रचंद्रोपलस्पर्शजलस्वल्पन
दीतटे ॥ अमरत्वप्रदानांचकंदानामुद्गमोऽभवत् ॥ ३१ ॥ अधित्यकासुतुंगासुचमर्यश्चारुदर्शनाः ॥
विचलंतिचलच्चंचच्चामरक्षेपविभ्रमाः ॥ ३२ ॥ वृंदानिकामधेनूनांहरिचंदनकानने ॥ आसी
नानिघनच्छायेरोमंथान्यत्रकुर्वते ॥३३॥ सुवर्णवर्णाःकपिलाः क्वचिन्मरकतत्विषः ॥ क्वचि
त्कर्पूरपूराभागावो रेजुश्चभूमयः ॥३४॥ स्मरंतोननृतुःप्रावृट्कालंसमदकेकिनः ॥ यत्रवल्लीतरु
स्मेरकुसुमासवसिंचनैः ॥ ३५ ॥ शुकाइवकथालापान्कीराहंसाश्चकोकिलाः ॥ चक्रिरेसद्विजा
श्चान्येचूतचूलाग्रनिश्चलाः ॥३६॥ समाधिशांतहृदयरहसस्तापसाभुवि ॥ निश्चलाइवकुंजेषुमहे
शालिंगरूपिणः ॥ ३७ ॥ सालक्तकपदन्यासैर्व्रजंतीनांप्रियांतिकम् ॥ पूजावानिवरक्ताब्जैःशै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लोभूत्सिद्धयोषिताम् ॥ ३८ ॥ विकचेषुरसालेषुमकरंदप्रवर्तिषु ॥ काकलीचंचरीकाणांजहार यमिनांमनः ॥ ३९ ॥ तंदृष्ट्वाशैलममलंविमलीकृतमानसाः ॥ सभामालोकयांचक्रुश्चक्रिणा योजिताद्विजाः ॥ ४० ॥ इतिश्रीब्रह्मांडपुराणेकैलासवर्णनंनामचतुर्थोऽध्यायः ॥ ४ ॥ सन त्कुमार उवाच ॥ ददृशुस्तेसभांशंभोर्याकृताविश्वकर्मणा ॥ शिलाभीरत्नरूपाभिःकांचनाद्यैः सचंदनैः ॥ १ ॥ लसत्सिंहावलीयत्ररचिताप्रथमास्तरे ॥ ततःकिन्नरपत्रालीततोयुद्धचद्गजाव ली ॥ २ ॥ ततस्तुरंगपंक्तिःस्यात्पत्रवल्लीविलासनम् ॥ ततःकमलबंधश्चरत्नबंधस्तथोपरि ॥ ॥ ३ ॥ निस्तलाञ्छोणललितान्सोमकांतमयास्तरान् ॥ निर्मायसप्तरचिताश्चंचत्कांचन भूमिकाः ॥ ४ ॥ मुक्तासुधाधवलिताभित्तयःस्फटिकत्विषः ॥ माणिक्यबद्धसोपानमार्गाः शुंडद्वयांकिताः ॥ ५ ॥ इंद्रनीलोपरिस्तंभोपरिस्तंभाबलिप्रभाः ॥ पद्मरागकृतोत्तालकुलिश ग्रहणानिच ॥६ ॥ जाग्रत्प्रभापुष्परागचतुःपट्टिकसंवृताः ॥ दंडाप्रचंडाश्चंडांशुदृषत्खंडैर्विनि र्मिताः ॥ ७ ॥ पद्मरागशलाकाभिर्वलभीर्यत्रशोभते ॥ इंद्रनीलकृताःसार्योमुक्तास्तबकसुं दराः ॥ ८ ॥ नीराजनकृतोद्योगाःसौवर्णाःशालभंजिकाः ॥ कर्पूरपात्रविन्यस्तरत्नदीपानि



रंतरम् ॥९॥ इत्यादिसप्तभूमीनांशेखरेकनकोद्भवः ॥ कलशःसूर्यतेजस्वीपताकांचलवीजितः ॥ १० ॥ यस्यांदेवगुरुर्वक्ताकविर्दैत्यगुरुःस्वयम् ॥ सकलानांकलानांचज्ञाताविद्वद्भिर्बुधः ॥ ११ ॥ शिवस्यमान्यःशिरसासर्वज्ञस्यकलानिधिः ॥ जगन्निर्वापकत्वंहिगुणःसर्वत्रपूज्यते ॥१२॥ उपतस्थुर्महेशस्यदृगंचलमतंद्रिताः॥रूपवत्योणिमामुख्याःकिंकर्यइवसिद्धयः॥१३॥ मरुतोवसवोरुद्राः सिद्धविद्याधरादयः ॥ कुबेरप्रमुखायक्षाहाहाद्याःसुरगायकाः ॥ १४ ॥ एकाग्रमनसस्तिष्ठन्नारदाद्याःसुरर्षयः ॥ कुबेरप्रमुखाश्चान्येगीतज्ञाःपरितोषकाः ॥ १५ ॥ तिलोत्तमाद्यास्तारुण्यभरस्फारमदोद्धताः ॥ वीक्षंतेनृत्यसमयंसमुदायैर्निजैर्वृताः ॥ १६ ॥ निधयःशंखपद्माद्याःकुंदाद्यामूर्तिधारिणः ॥ सेवंतेशूलिनोदृष्टिंप्रह्वीकृतमनोंबुजाः ॥ १७ ॥ इंद्रःसिंहासनासीनंस्वामिनंप्रणनामच ॥ सहस्रदृष्टिपातेनकराभ्यांजगदीश्वरम् ॥ १८ ॥ ज्वालारोमांकुरःशीतइवशांत्याकुलाचलः ॥ उपतस्थेशिवंयत्ररूपधारीधनंजयः ॥ १९ ॥ दंष्ट्राकरालवदनः प्रज्वलद्वह्निलोचनः ॥ नमस्करोतिभूतेशंकृतांतःशांतमानसः ॥ २० ॥ विकोशकरवालेनदीव्यन्मुष्टिश्चनैर्ऋतः ॥ प्रह्वीकृतदृशानित्यमुपास्तेचंद्रशेखरम् ॥ २१ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अंगनेपरमेशस्यसेकसंमार्जनादिकम् ॥ स्थीयतेकुर्वतोदास्यंचरमाचलभूभुजा ॥२२॥ रजो
नुजगतः प्राणः सभाजिरगतः क्षणात् ॥ समरुच्चंद्रचूडस्ययत्रकिंकरतांगतः ॥ २३ ॥ नि
धीन्सर्वान्पुरस्कृत्यकुबेरोभौरिकींश्रियम् ॥ आस्थायलोचनंशंभोः पर्युपास्तेसुभक्तिमान् ॥
॥ २४ ॥ मार्तंडश्चंडकिरणइवलोकसुखप्रदः ॥ मूर्त्याप्रसन्नयायत्रभजतेपार्वतीपतिम्॥२५॥
स्थितोपिशेखरेशंभोः कलयामूर्तिमाञ्छशी ॥ वृंदेवृंदारकाणांचसमयेसेवतेशिवम् ॥ २६ ॥
नंदयंतिसुराः केचिन्नित्यंसदसिशूलिनः ॥ स्वेदक्लांत्यपनोदायप्रलंब्यव्यजनानिलम् ॥२७॥
सुगंधिद्रव्यसंपूर्णास्त्रिदशानांकरेस्थिताः ॥ तन्वंतिसौरभंधूमंज्वलंत्योधूपवर्तयः ॥ २८ ॥
धारागृहगलद्धारिसीकराश्चंद्रिकोज्ज्वलाः ॥ निर्वापयंतिसूर्याग्न्योर्मध्यदेशेस्थितान्सुरान् ॥
॥ २९ ॥ उत्तानानिसुरत्नानिदीप्तिमंतिमहांतिच ॥ वितानस्थानिसुस्थानिजज्वलुर्यत्रसुंदरे
॥ ३० ॥ इतिश्रीब्रह्मांडपुराणेचंद्रचूडसभावर्णनंनामपंचमोऽध्यायः ॥ ५ ॥ सन
त्कुमार उवाच ॥ दृष्ट्वातेब्राह्मणाः शंभोःसंसदंरत्ननिर्मिताम् ॥ विस्मयंबहुलंजग्मुः कलावद्भि
र्निषेविताम् ॥ १ ॥ ततस्तैर्भाग्यसंरंभैः सभायामभयप्रदः ॥ दृष्टःकपर्दीभगवाञ्छृणुध्वंतद्वि



जोत्तमाः ॥२॥ येनश्रुतेनभवतांदुःखोपहतचेतसा ॥ कलिकालाभिभूतानामानंदोजायतेह
दि ॥ ३ ॥ द्वात्रिंशत्सिंहकलितेरत्नपंक्तिविराजिते ॥ जांबूनदसुवर्णेनघटितेनिस्तुलेऽमले ॥
॥ ४ ॥ नानाप्रभासमाकीर्णेविद्युत्पुञ्जोज्ज्वलत्विषि ॥ मरालगलतूलौघतूलिकोत्तरसुच्छदे ॥
॥५॥ समासीनंशिवंसाक्षाद्ददृशुश्चर्मचक्षुषा ॥ धर्मस्यपुत्रास्तेसप्तपूर्वपुण्यफलोदयात् ॥६॥
कुंदेंदुचंद्रिकाचक्रकाश्मीरमहसांचयम् ॥ पुण्यराशिमिवोत्तुंगमुत्तुंगस्फटिकोपमम्॥७॥नाना
चरित्रयशसामुच्छ्रायोपनतंशिरः ॥ क्षुब्धक्षीराब्धिकल्लोलमालास्नातमिवामलम् ॥८॥ गोक्षी
रधामधवलंधवलांभोजपूजितम् ॥ लेपितंचंदनेनेवकर्पूरपुलकार्जितम् ॥९॥ वीतरागानुरागा
णांविराजेतेनिधीइव ॥ सरागेयस्यदेवस्यचंचच्चरणयोस्तले ॥ १० ॥ सर्वलक्षणसंपूर्णेलक्षणा
तिगतस्यच ॥ आरक्तांभोजदर्पौघदलनेशोक सुंदरे ॥ ११ ॥ तमांसिमानसस्थानिविनश्यं
तिप्रणामतः ॥ पादयोर्यस्यनमतांनखचंद्रमहांशवः ॥ १२ ॥ कालव्यालमिषेणैवराजतेयस्य
तोडरे ॥ विश्वग्रासोत्सुकः कालश्चरणेकटकाकृतिः ॥ १३ ॥ आसनंबद्धपर्यंकंस्वस्तिकंस्व
स्तिदायकम् ॥ सम्यग्विलोकमानानांशंभोर्यस्यविराजते ॥ १४ ॥ व्याघ्राजिनपरीधानंभुजं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गेनदृढीकृतम् ॥ ध्यायतांकाममदनंदेवानांयस्यसेविनाम् ॥१५॥ नाभिनासुंदरंतुंदंगंभीरेण
मनोहरम् ॥ वलित्रयविलासेनयस्यविश्वावकाशकृत् ॥१६॥ नाभीन्हदतटोल्लासानंदवल्लीवसुं
दरा ॥ यस्यत्दन्मंडपंयातारोमराजिर्विराजते ॥ १७ ॥ राजतंनिर्मितंयस्यसुविशालमुरस्थ
लम् ॥ पार्वतीप्रेममंजूषाकपाटमिवराजते ॥ १८ ॥ त्रिशूलंडमरुंखड्गंपानपात्रंशरासनम् ॥
खट्वांगंबाणसहितंपरशुंमृगमंकुशम् ॥१९॥ दशायुधानियस्यैवंविलसंतिकपर्दिनः ॥ दोर्दंडेषु
प्रचंडेषुचंडाहिवलयेषुच ॥ २० ॥ अंभोरुहाणांपंचानामेकनालइवस्थितः ॥ विभातिभक्त
वात्सल्याद्यस्यकालगिलद्गलः ॥ २१ ॥ प्रालेयशुद्धमीशस्यकंदर्पदहनोद्यतम् ॥ लोचनत्रितयं
यस्यपश्चिमाननमुत्तमम् ॥२२॥गौरंसतिलकंपांडुगंडप्रहसितंमुखम् ॥ औत्तरंयस्यदेवस्यव
क्त्रंकमलसन्निभम् ॥ २३ ॥ कल्पांतज्वलनज्वालातडित्पुंजप्रभारुणम् ॥ इंदुगंगाजटासर्पैः
पूर्ववक्त्रंविराजते ॥ २४ ॥ नीलजीमूतसंकाशंज्वलद्दंष्ट्रंसुभैरवम् ॥ सर्पप्रेतकपालालिशेखरंद
क्षिणंमुखम् ॥२५॥ व्यक्ताव्यक्तंगुणातीतंसगुणंलक्षणातिगम् ॥ पंचमंवदनंयस्यतडिन्माला
कुलंयथा ॥ २६ ॥ यस्यदेवस्यवामांगसंगिनीतिहिमाद्रिजा ॥ दिव्यरत्नमणेश्चंचत्प्रभेवप्रति



भातिया ॥ २७ ॥ यस्यामंगलसूत्रस्यबलेनगरलंपपौ ॥ कातकालकलालीलंत्रैलोक्यग्रास
साहसम् ॥ २८ ॥ रतिकंदर्पयोश्चित्तपद्मेरक्तांबरद्युतिः ॥ तलेचरणयोर्यस्याःसानुरागे
दिवानिशम् ॥ २९ ॥ मंजीरसिंजितंयस्याः पादयोर्बिरुदावलिः ॥ वाग्विला
सायतनुतेनिजांमाधुर्यतामिव ॥ ३० ॥ बंधूकपटलालक्तदाडिमीकुसुमोपमम् ॥ उवा
सवसनंदेवीयासंध्यारागसन्निभम् ॥ ३१ ॥ पीनोत्तुंगेकुचतटेकंचुकंकांचनप्रभम् ॥ भां
डागारमिवोत्तानंयस्याः कंदर्पभूभुजः ॥ ३२ ॥ ग्रीवाविलासललिताराजतेमौक्तिकाव
लिः ॥ सौंदर्यसूत्रंकंदर्पवदनस्तनयोरिव ॥३३॥ नानारत्नसमुच्छ्रायविस्फुरत्किरणावलिः ॥
यस्याग्रैवेयकंभातिनिधानमिवतेजसाम् ॥३४॥ यस्याः कनकताटंकनेमिमुक्ताफलानिच ॥
अनंगवक्त्रनिपतन्मनांसीयवतात्मनाम् ॥३५॥ वदनेमदनोल्लासान्यस्याः कलयितुंशिवः ॥
नयनानिबहून्येवबभारजगतांपतिः ॥३६॥ बिंबेयदिस्याच्छशिनोनीलोत्पलदलद्वयम् ॥
तदोपमानयनयोस्तस्यस्याश्चारुचक्षुषः ॥३७॥ यदिशौक्रस्यबिंबस्यकनकांभोजमासनम् ॥
भवेन्नासामणेस्तस्यसादृश्यंचंपकत्विषः ॥३८॥ मुखचंद्रामृतस्येवधारादंतोच्छलत्विषः ॥ य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्याः शिवचकोरायराजतेऽधरपल्लवः ॥३९॥ उत्तरंगैरिवाकीर्णंकालिंद्यानीलिमावृतम् ॥ य
स्याः कटाक्षविक्षेपैरभूत्प्रतिदिशंनभः ॥४०॥ अष्टमीचंद्रसदृशंललाटंप्रतिभातियत् ॥ ज्याब
द्धकार्मुकाकारंयस्याः कुसुमधन्विनः ॥४१॥ मालतीकलिकागर्भैर्गुंजंतीभ्रमरावलिः ॥ लक्ष्य
तेलक्षणोपेतेयस्याश्चिकुरपंजरे॥४२॥अगाधेस्मिन्सुधासिंधौगंगेवैकमुखीशिवा ॥ शिवेमिल
द्रसमयीरोमांचैः पुलकांकितैः ॥४३॥ विद्याविद्याधरैर्वंद्यादेवानामधिदेवता ॥ जगन्मंदिर
निर्माणस्थाणौयाशालभंजिका ॥४४॥ याचैतन्यकलाविश्वरूपिणः परमेशितुः ॥ नित्यास
त्यास्वयंमायामोहिनीलीलयाशिवा ॥४५॥ तयान्वितंशिवंदृष्ट्वाकृतकृत्यामुनीश्वराः ॥ पेतुस्ते
दंडवद्भूमौबाष्पपूरितलोचनाः ॥४६॥ उत्थापिताभृंगिणातेपृष्ट्वाकेयूयमित्यपि ॥ विप्राः प्रवे
शिताःस्वर्णवेत्रहस्तेननंदिना ॥४७॥ इतिश्रीब्रह्मांडपुराणेशिववर्णनंनामषष्ठोऽध्यायः ॥६॥
सनत्कुमार उवाच ॥ कथंतेमुनयः सप्त तंदृष्ट्वागिरिजापतिम् ॥ स्तोत्रंप्रचक्रुर्भावेनशुद्धेनजगतां
विभोः ॥१॥ ऋषय ऊचुः ॥ नमोस्तुतेमहादेवनमस्तेजगदीश्वर ॥ नमोस्तुतेजटाजूटसंराजच्चं
द्रभूषण॥२॥नमोरुद्रायमहतेनमस्तेगिरिजाप्रिय॥नमस्तेजगतांनाथनमस्तेभक्तवत्सल॥३॥

नमस्तेदेवदेवेशनमस्तेलोकपालक ॥ नमस्तेजगदाधारनमस्तेवरदेश्वर ॥ ४ ॥ नमस्ते
भूतभव्येशनमस्तेभूतभावन ॥ नमस्त्रिपुरहंत्रेचनमस्तेत्रिदशेश्वर ॥ ५ ॥ नमस्तेस्तुज्ञानदात्रे
नमस्तेवाग्विभूषण॥नमस्तेवेदविदुषेनमस्तेवेदधारिणे॥६॥नमस्तेभूतदमननमस्तेसुरमर्दन॥
नमस्तेजगदाधारनमस्तेजगतांप्रिय ॥ ७ ॥ नमः पिनाकहस्तायनमस्तेकृत्तिवाससे ॥ नमोऋ
षिगणाध्यक्षनमस्तेसन्मुनिप्रिय ॥८॥ नमस्तेमुनिपालायनमस्तेमुनिसंश्रय॥नमस्तेवरदेशाय
नमस्तेधर्मपालक॥९॥नमस्तेधर्मकर्तॄणांमार्गादेशकरप्रभो॥नमस्तेस्तुतपःप्राप्यनमस्तेतापस
प्रियः ॥१०॥ नमस्तपोनिधानायनमः पालायतेनमः ॥ सृष्टिस्थितिविनाशानांकर्त्रेतुभ्यंनमो
नमः ॥ ११ ॥ सभामध्यगतांदृष्ट्वाविह्वलीकृतमानसः ॥ उवाचब्राह्मणाञ्छंभुः केनयूयंसुदुः
खिताः ॥ १२ ॥ ऋषय ऊचुः ॥ मणिमल्लौमहादैत्यौमणिशैलाधिवासिनौ ॥ ब्रह्माणंतपसा
राध्यतावजेयत्वमागतौ ॥ १३ ॥ नवध्यौपंचवक्त्रेणचतुर्वक्त्रेणवाक्वचित् ॥ षण्मुखेन
दशास्येनदशबाहुवतापिवा ॥ १४ ॥ सहस्रबाहुनावापिदेवधुर्येणकेनचित् ॥ राक्षसेनापिम
नुजैः सिद्धविद्याधरादिभिः ॥ १५ ॥ वरदानबलोन्मत्तौदुर्मदौदुष्टमानसौ ॥ ताभ्यांमहीतले



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राज्यंक्रियतेलोकपीडनम् ॥ १६ ॥ याभ्यांबिभेतिशक्रोपिनृपाणांतत्रकाकथा ॥ ऋषी
णामाश्रमाः सर्वेविध्वस्तास्तेनपीडिताः ॥ १७ ॥ उन्मूलितानिलिंगानिस्वयंभूनिविनोदतः ॥
जलतीर्थेषुरम्येषुविचेरुः कुंजरास्तयोः ॥१८॥ तयोरनुचरैः स्वर्गात्केशाकर्षणविह्वलाः ॥ दि
व्याः सुरविलासिन्योभुक्ताः प्रापय्यभूतलम् ॥ १९ ॥ पानकेलिविलासायप्रेमपात्रंमरुत्वतः ॥
आनीतममरावत्यामेनकाख्यंमनोहरम् ॥ २० ॥ प्रत्यहंनंदनोद्यानात्तत्तुष्ट्यैकुसुमानिच ॥
पारिजातस्यमघवाप्रस्थापयतितद्भयात् ॥ २१ ॥ आसेवायघटीर्बद्धास्तद्भृत्यैःकल्पशाखि
नाम् ॥ दातव्यंकल्पितंतौर्हिसुष्टुदुष्टमथापिवा ॥ २२ ॥ निक्षेपितः सुरमणिः कंचित्कालंमरु
त्वता ॥ संरंभाच्चैववैकुंठंसुराणांसुरभिर्ययौ ॥२३॥ पीयूषरसपूर्णानिस्वर्णवर्णानिनित्यशः ॥
अत्यर्पयतिसुत्रामाप्रीत्याभीत्याफलानिच ॥ २४ ॥ यत्किंचिन्नागलोकेस्मिन्नपूर्वंवस्तुसुंद
रम् ॥ भोग्यंतयोर्विभोगायशक्रः प्रापयतिक्षणात् ॥ २५ ॥ अग्निस्तयोः प्रतापेनदाहभीतइ
वानिशम् ॥ सुकंपमानहृदयः स्वांपुरीमधितिष्ठति ॥२६॥ विश्वसंहाररसिकः कृतान्तः शास
नात्तयोः ॥ नबिभर्तिकरेदंडंचंडविक्रममंडलम् ॥ २७ ॥ कोणेशः कौणपोजातिमात्रभावेन



गोचरः ॥ दानादानादिकंप्रेमतनुतेसततंतयोः ॥२८॥ वरुणोवारुणीभ्रांतइवभीत्यैववेपते ॥
शिरसावंदतेसम्यक्तदादेशविचेष्टितम् ॥ २९ ॥ सर्वदासर्वगोवायुस्तत्कांतासुरतश्रमम् ॥
हरतेस्वल्पभावेनभयोत्कर्षमुपागतः ॥ ३० ॥ संप्रापयतियक्षेशः प्रीत्यैवभयगर्भतः ॥ नृत्य
गीतेषुचतुराः कामिनीरलकापुरात् ॥ ३१ ॥ माणिक्यदीप्तिरत्नानिचिंतामणिसमानिच ॥
ददात्यब्धिः किमाश्चर्यंययोरिंद्रोऽपिसेवकः ॥ ३२ ॥ तपोव्ययभयाद्दैत्यान्नशपंतिमुनीश्व
राः ॥ शूनिदंडाहतेशौचहानिः किंनैवजायते ॥ ३३ ॥ तयोर्मुख्यस्तुमल्लाख्यः समदोपिप्रता
पवान् ॥ आश्रमान्नः समभ्येत्यनानादुःखंतदाकरोत् ॥ ३४ ॥ सर्वज्ञः सर्वदर्शीत्वंयद्वृतंत्तन्नवे
त्सिकिम् ॥ सर्वथापीडितास्तेनत्वयिस्वामिन्यनाथवत् ॥ ३५ ॥ कथंयामःकथंदेवज्ञातात्वं
दोषदंडयोः ॥ तेषामितिवचः श्रुत्वाशिवोवचनमब्रवीत् ॥ ३६ ॥ श्रीशिव उवाच ॥ महताब्रा
ह्मणादुष्टकर्मणाभिगतायुषा ॥ भग्नास्तेनमनोरम्यारुद्रहंसस्यपंजराः ॥ ३७ ॥ प्रध्वस्तामम
मल्लेनकालसर्पस्यपेटकाः ॥ विप्रालौल्यवशेनेवमूषकेणक्षतायुषा ॥ ३८ ॥ दैत्याधमंग्रसामी
तिसाट्टहासंसमुत्थितः ॥ जटाः संत्रासयामासफटाटोपाहिनाभुवि ॥ ३९ ॥ अजायतमहा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मारीदीप्तदावानलप्रभा ॥ सिक्तातैर्मुनिभिर्दीप्तैरोषोत्कर्षेणसर्पिषा ॥ ४० ॥ ततःसाघृतमारी
तिनामधेयमुपागमत् ॥ दंष्ट्राकरालवदनाजिह्वाललनभीषणा ॥ ४१ ॥ नानायुधधरात्युग्रा
शतभैरवनादिनी ॥ ज्वलच्छिखेवकल्पाग्नेर्वर्द्धिताभुवनत्रये ॥ ४२ ॥ ॥ इति श्रीब्रह्मां
डपुराणेशिवविज्ञापनोनामसप्तमोऽध्यायः ॥ ७ ॥ सनत्कुमार उवाच ॥ शृणुध्वंब्राह्मणायूयंक
लिसंतप्तमानसाः ॥ कलौसिद्धिप्रदंनृणांभक्त्यायत्स्वल्पयापिवा ॥ १ ॥ मार्तंडभैरवंरूपंदधा
रसहसाविभुः ॥ महाहिवलयोत्तर्यंचंडमार्तंडकुंडलम् ॥ २ ॥ डमरुत्रिशूलसहितंखड्गपात्रसु
शोभितम् ॥ तप्तकांचनसंकाशंमुंडमालाविभूषितम् ॥ ३ ॥ माणिक्यपंक्तिसदृशंदशनावलि
शोभितम् ॥ खंडेंदुशेखरंत्र्यक्षंमहामुकुटमंडितम् ॥४॥ वसंतखेलनोद्धूलद्रजनीचूर्णगुंठितम् ॥
तापिच्छछविपिच्छालिचलच्चामरवीजितम् ॥ ५ ॥ उत्तुंगस्तनसंभारतरुणीकरपल्लवैः ॥
क्रुध्यमानमहारावसारमेयसमाकुलम् ॥ ६ ॥ सप्तकोटिगणाकीर्णंपिशाचावलिपालितम् ॥
एवमास्थायतद्रूपंतेजसातीवभासुरम् ॥ ७ ॥ सूर्यकोटिप्रतीकाशंचंद्रकोटिसमप्रभम् ॥ आदि
देशसुरान्सर्वान्निर्यातसमरोद्धुराः ॥ ८ ॥ शस्त्रैरस्त्रैःसमायुक्तावाहनैः स्वैरलंकृताः ॥ सन्नाहैर्व



ज्रकवचैस्तडिद्दीप्तिसमप्रभैः ॥ ९ ॥ अथतेत्रिदशाःसर्वेनिजसेनासमावृताः ॥ सैनिकाःसम
रानंदसंदोहैर्मुहुराबभुः ॥ १० ॥ उपत्यकासुकैलासगिरेःसुसमभूमिषु॥तेषांसेनापृथक्स्वामी
दर्शयामासशूलिनः ॥ ११ ॥ आरूढस्यवृषस्कंधेक्रोधज्वलितचक्षुषः ॥ मयूरचामरस्फारप्रभा
मुकुटशोभिनः ॥ १२ ॥ शुभ्रांशुमंडलाकारधवलछत्रशोभिनः ॥ प्राक्प्रतापयशःपाटबंदिसं
घनुतस्यच ॥ १३ ॥ स्कंद उवाच ॥ मयूरवाहनादेवाः शक्तिकुंतायुधोद्यताः ॥ उल्लसन्नीलस
न्नाहावीरास्तेममसैनिकाः ॥ १४ ॥ आदिगंतंगजारूढास्फूर्जत्कुलिशशोभिताः ॥ शोभतेपल्ल
वछत्रैर्देवेंद्रस्यचमूरियम् ॥१५॥ गतेर्विलासंकुर्वंतितुरंगाःसादिनोदिताः ॥मनोरथमयंयत्रसा
सेनावज्रिणोपरा ॥.१६॥ शक्तिशस्त्रज्वलद्दीप्तिर्वाहिनीमेषवाहना ॥ दावदीप्ताद्रिसंकाशासेनेयं
जातवेदसः ॥१७॥ गलघंटालुलल्लोलनादसैरिभभासुरा ॥ प्रचंडोद्दंडदोर्दंडासेनेयंशामनीवि
भो ॥ १८ ॥ दंष्ट्राकरालवदनंक्रव्यादबलमुत्कटम् ॥ दर्पधारावलीखड्गंदेवंनैर्ऋतमास्थितम्
॥१९॥चलत्पाशावलीहस्तावारुणीयमनीकिनी ॥ कुंकुमारुणनासीराराजतेचंद्रशेखर॥२०॥
ध्वजपल्लवसंछन्नासेनेयंतातवायवी।ध्वजायुधामहाघोरामर्मराभासुरारुणा।२१।चंचत्कांचनस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्नाहाकाञ्चनछत्रभूषिता ॥ स्वर्णोदग्रांकुशैर्भातिसेनेयंनारवाहिनी ॥२२॥ यत्रोंदूरुमुखावाहाग
जास्यायत्रसादिनः ॥ दीप्तांकुशकुठारश्रीर्लंबोदरचमूरियम् ॥२३॥ मृगास्यास्तुरगायत्रछत्रा
णिधवलानिच ॥ चामराणिप्रभावंतिसाचांद्रीसबलाचमूः॥२४॥स्यंदनाःसप्ततुरगास्तडिन्मा
लोल्लसत्प्रभाः ॥ उल्लोलछत्रसंकाशाहरिदश्वस्यसाचमूः ॥२५॥ हंसकांतिमयोत्तुंगास्तुरगायत्र
कुंजराः ॥ अब्जयोनेरियंसेनाकमंडलुकृतध्वजा ॥ २६ ॥ नीलमेघांजनच्छायसन्नाहाशंखच
क्रिणी ॥ देवपीतांबरच्छन्नासेनागारुडवाहिनी ॥२७॥शूलखट्वांगहस्तेयंगजचर्मपरिच्छदा ॥
सेनेयंतावकीशंभोलोचनत्रयभूषिता ॥ २८ ॥ इतिदर्शयतिस्कंधेक्रोधान्मल्लवधोद्यतः ॥ मा
र्तंडभैरवःशीघ्रंययौमणिमयाचलम् ॥ २९ ॥ चलंतिरौद्रावेतालाभूताःप्रेताश्चडामराः ॥ शा
किन्योमातरोत्युग्रानानायुधकरोद्यताः ॥ ३० ॥ भ्रमत्खट्वांगहस्ताग्राःकेचिन्मुसलपाणयः ॥
चलच्छक्तिधराःकेचित्केचित्परशुधारिणः ॥ ३१ ॥ त्रिशूलतुलनोत्साहाःकेचिल्लांगलपाण
यः ॥ शोभितामुद्गरैःकेचित्केचित्तुंगगदाधराः ॥ ३२ ॥ केचिल्लोहार्गलास्कंधाश्चक्रचालन
तत्पराः ॥ शंखचक्रभृतःकेचित्कालदंडास्त्रमंडिता ॥ ३३ ॥ केचिच्चशबराभिल्लाःकुंतपट्टि



शधारिणः ॥ धनुर्बाणधराःकेचिद्भिंडिमालाकरोद्यताः ॥३४॥ चर्मखड्गधराश्चान्येखेटकुंता
महाबलाः ॥ मुद्गरान्भ्रामयंत्येकेकेचित्कंकणदंडकान् ॥ ३५ ॥ नाभिचुंबिप्रलंबोष्ठादंष्ट्रालं
कृतवक्षसः ॥ केचित्प्रचंडनयनाव्याजृंभास्याश्चकेचन ॥ ३६ ॥ केचिद्विस्तृतसिंहास्याःके
चिद्वीराःषडाननाः ॥ शुंडानासावक्रतुंडास्त्रिशीर्षाःसप्तशीर्षकाः ॥३७॥ षट्सप्ताष्टकराःकेचि
द्विलंबिहनुकुंतलाः ॥ ललाटभृंगविकृताःकेचिद्बालविलोचनाः ॥ ३८ ॥ केचिद्धर्घरिका
वक्त्रानाभिस्पृग्रसनांचलाः ॥ तिर्यक्कूर्चछटाटोपाजटाछन्नांगयष्टयः ॥ ३९ ॥ केचिदूर्ध्वकरा
क्रूराकेचिद्दीप्तविलोचनाः ॥ मुंडमालाधराःकेचित्केचित्कर्णावृताननाः ॥ ४० ॥ केचिदूर्ध्वप
दाःशीर्षकरयानमहोत्कटाः ॥ केचिन्नीलाननाःकेचिद्रक्तांगादंतुराननाः ॥ ४१ ॥ केचिद्ग
लंडभूषांगाववल्गुःसत्वसंभ्रमाः ॥ महामान्यामहोत्साहामहादेवात्मजाइव ॥४२॥ त्रिसप्तन
वजिह्वाश्चपंचसप्तदशाधराः ॥ चतुष्कर्णास्त्रिकर्णाश्चज्वालास्याःपंचतुंदिलाः ॥ ४३ ॥ वाद्य
त्संग्राममुरजाध्वनिनाद्यामपूरयन् ॥ रणदुंदुभयोढक्कानिःसाणाघनघोषिणः ॥ ४४ ॥ उद्घो
षारणकंकालारणतालाःसुनादिताः ॥ जयघंटादिवाद्यानियुगपद्ध्वनुस्तदा ॥ ४५ ॥ रेणुश्च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रणमोहेयाजुघुषुर्युद्धभैरवाः ॥ सस्वनुर्युद्धकांसोलाश्चक्रणूरणघोलकाः ॥ ४६ ॥ तथापिनाकि
वाद्यानिजगर्जुर्डिंडिमादयः ॥ ववदुर्दीर्घशृंगाणितस्तनुःपटहादयः ॥ ४७ ॥ गगनंप्रावृतंभा
तिनानावर्णध्वजांचलैः ॥ शूलिनःक्रोधवीरस्यवितानमिवविस्तृतम् ॥ ४८ ॥ छत्रैर्मूर्धसुवीरा
णांचलद्भिःस्वर्णदंडकैः ॥ चंद्रिकापूरितंव्योमतदाभूद्रजनींविना ॥ ४९ ॥ शिरस्सुरथिनांत
द्वत्करिस्कंधाधिरोहिणाम् ॥ चलन्मयूरकुंचानांदीप्त्याशून्यमभूद्घनम् ॥५०॥ ततःफणिफणा
टोपैःपृथिवीमज्जनोन्मुखी ॥ वराहदंष्ट्राभंगश्चचतुरंगस्यभारतः ॥५१॥ सेनाघोषेणदुग्धाब्धिः
क्षोभितोमधुसूदनः ॥ तेनैवजागरांचक्रेशेषपर्यंकलालितः ॥ ५२ ॥ जंगमागिरयोनीलाइव
धावंतिकुंजराः ॥ महावदंकुशानुग्रानगण्यमदोद्धताः ॥ ५३ ॥ तत्रतेषामभून्मार्गेमदासारै
स्तरंगिणी ॥ तांचतेरुर्हयाःसादियुक्तायद्युद्धरंहसः ॥ ५४ ॥ क्षुभ्यद्वाहखुराघातैश्चूर्णीभूताश्म
जंरजः॥घर्षणैश्चक्रनेमीनामस्पृशद्दिवमध्वनि ॥५५॥ इत्यस्वल्पबलोपेतंश्रीमन्मार्तंडभैरवम्॥
विलोक्यानुचरामल्लंकथयामासुरासुराः ॥ ५६ ॥ इतिश्रीब्रह्मांडपुराणेशिवसैन्यवर्णनन्नामअ
ष्टमोऽध्यायः ॥८॥ सनत्कुमार उवाच ॥ अथागतंमहेशस्यसैन्यंसर्वदिगंतरात् ॥ असंख्येयम

नाख्येयंदीप्तशस्त्रावलीवृतम् ॥ १ ॥ इतितंकथयामासुर्दैत्यानामधिपेश्वरम् ॥ मल्लंतस्यासुरें
द्रस्यदूताविभ्रांतचेतसः ॥२॥ मल्ल उवाच ॥ कोसौमहेशःकिंसैन्यंवृषभेणसमृद्धिमान् ॥ यस्य
प्रावरणंभस्मभूषणानिभुजंगमाः ॥ ३ ॥ इतिवित्तपतेर्वैरंरंकोयंकथयत्यलम् ॥ रेदूताहनतैनंहि
विपरीतार्थभाषिणम् ॥ ४ ॥ सुहृदाममतस्याद्रिःकैलासोभुजपंजरे ॥ निधायांदोलितस्तस्य
बलंमत्पुरतःकथम् ॥ ५ ॥ अथासौलीलयोत्तिष्ठन्नुत्तुंगशिखरंगतः ॥ तस्मादालोकयामासशं
भोःसैन्यंसदैत्यराट्॥६॥तद्दृष्ट्वानिर्भयोदैत्यःशूरेभ्योदत्तवान्गजान् ॥ सुरार्दनायशूरायददावै
रावतंगजम् ॥७॥ निर्जरध्वंसिनेवैरिसेनाकोलाहलाभिधम् ॥ विद्युत्पातायशकटंचतुर्वाजिवि
राजितम् ॥ ८ ॥ उद्धतायचमल्लायचतुर्दंतंमहागजम् ॥ देवशल्यायवीरायददौसुरपतेर्गजम्
॥ ९ ॥ तस्मैचवाजीचित्रांगोदत्तःकाश्मीरसद्वपुः ॥ रत्नकांचनपल्याणसंराजत्पृष्ठमंडलः ॥
॥१०॥ कुंजरंसैरिभास्यायहिमवंतंमहाबलम् ॥ इंद्रगोपंतुरंगंचचतुश्चामरवीजितम् ॥११॥
सुरेंद्रदर्पदलनोबहूनांरक्षसांपतिः ॥ तस्मैकर्पूरतिलकंवाजिनंचगजाधिपम् ॥१२॥ चामरा
णिप्रभावंतिसन्नाहंसूर्यतेजसम् ॥ वैरिदर्पहरंखड्गंतांबूलंशशिनासह ॥ १३ ॥ सुरग्रासायदेवा



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रिंहस्तिनंजयमंगलम् ॥ अश्वंचंद्रांशुसन्नाहंभल्लंनिजकरेस्थितम् ॥ १४ ॥ नरविध्वंसकायेभं
कस्तूरीकवचाभिधम् ॥ नंदनोद्यानदलनंकुंजरंचमहामदम् ॥१५॥ वाहैश्चतुर्भिसंयुक्तंपद्मरा
गसमप्रभैः ॥ कांबोजैश्चंडकोपायरथंचविजयध्वजम् ॥१६॥ सिंधुनादायमत्तालिमालाव्या
कुलिताननम् ॥ प्राक्संग्राममहाशौर्यपरितोषेणसिंधुरम् ॥ १७ ॥ इंद्रनीलप्रभावाहाःशिबि
रंकनकप्रभम् ॥ यस्यतंस्यंदनवरंप्रायच्छद्गोमुखायच ॥१८॥ यत्रसिंदूरवर्णाश्चश्यामकर्णाम
रुज्जवाः ॥ तंरथंधूम्रवर्णायगजंनीलगिरिंददौ ॥१९॥ उल्लसंनीलमकरंस्वर्णवर्णाश्वभूषितम्॥
कृष्णध्वजंरथंशूर्पकर्णायव्यतरत्तदा ॥ २० ॥ ज्वालामुखःशूलजिह्वःसुरारिःसुरसूदनः ॥ क
रालःपावकाक्षश्चशक्तिदंडःप्रतापवान् ॥ २१ ॥ भीमाक्षोभीषणमुखोदेवमल्लोबुधांतकः ॥
निर्जरारिर्गजमुखोरक्ताक्षस्त्रिदशार्दनः ॥२२॥ कलाध्वंसीकुंभनासःसिंहपादोमरांतकः ॥ ख
राननःखररथःखररोमाखरांघ्रियुक् ॥२३॥ ऊर्ध्वकेशःसप्तबाहुनववक्त्रश्चतुर्भुजः ॥ हलदंतः
क्रूरदृष्टिर्लांगलीकलभाननः ॥ २४ ॥ वक्रदंतःखरनखः खड्गकेशःसुराननः ॥ असिजिह्वःकुं
तजिह्वःकूर्मकर्णस्त्रिलोचनः ॥२५॥ उदग्रास्योदुर्मदश्चचामरश्मश्रुरुन्नतः ॥ व्याघ्रांघ्रिर्दुर्धरोदु



ष्टःशूलरोमाविनाशिकः ॥ २६ ॥ त्रिनासःसप्तरसनस्त्रिशिराश्चचतुःशिराः ॥ विद्युत्केशोज्ज्व
लद्दंष्टोव्याघ्रवक्त्रःसुदुर्मतिः ।२७। दुर्मुखःशरभाकारःपवित्रासिर्बृहज्जटः॥तडित्कर्णःक्रोधमूर्तिः
पाशकर्णःप्रमोटकः ॥२८॥सिंहनादःक्रूरनादःखरनादोश्वहेषितः॥शुंडाहस्तःक्रोशबाहुस्तडि
द्वक्षास्त्रिपाद्बली॥२९॥नीलाननस्तित्तिरांगस्त्रिकर्णश्चंडविक्रमः॥श्वेतोदरःक्षताक्षश्चधूम्राशीवी
रखादनः॥३०॥सुग्रीवःशृंखलाहस्तःशूलग्रीवःशिवारुतः॥क्रोशमूर्तिर्महामूर्तिर्नभोमूर्तिर्महोत्क
टः॥३१॥इत्याद्यनेकदैत्यौघान्वाजिकुंजरचामरैः॥केयूरशस्त्रसन्नाहैः प्रियवाक्यैः सदुक्तिभिः
॥३२॥वस्त्रालंकृतितांबूलैरर्हयामासतत्क्षणात्॥आदिदेशततःसर्वांस्त्वर्यतांलघुसंगरे।३३।स्व
यमारुह्यचोत्तुंगंसहस्राक्षंमहारथम्॥सर्वशस्त्रास्त्रसंपूर्णंमंत्रयंत्रविधानवित्॥३४॥ क्षणंमल्लासुरो
दैत्यस्तेजसादीर्घतोबभौ ॥ निर्वाणसमयंप्राप्तःप्रदीपइवदुःसहः ॥ ३५ ॥ तद्वच्चमणिदैत्येशः
कुंजरस्कंधलालितः ॥ चलच्चामरवृंदानियद्वजेविलसंतिच ॥ ३६ ॥ तत्सेनावाद्यनिर्घोषैः क्षु
भितास्तोयराशयः ॥ वेमुर्जलतुरंगालिमिषेणसहसातदा ॥ ३७ ॥ उच्छलत्तुंगसलिलप्रकाश
द्रत्नजातयः ॥ आलिलिंगहरेःकंठंलक्ष्मीर्दुग्धांबुधिस्थिता ॥ ३८ ॥ आरक्तनीलपीताभैःछ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रैरापूरितंनभः ॥ सिंहनादैश्चदैत्यानांप्रतिशब्दैर्महीभृताम् ॥३९॥ शिखराणिजहुस्तेषांसहसा
वासलालसः ॥ उद्वेजिनःकिन्नरास्तेसेनाघोषैर्दिवंययुः ॥ ४० ॥ इतिश्रीब्रह्मांडपुराणेदैत्य
सैन्यवर्णनंनामनवमोऽध्यायः ॥ ९ ॥ सनत्कुमार उवाच ॥ शृणुध्वंब्राह्मणादुष्टकलिकालम
लापहम्॥चित्रंचरित्रंमल्लारेःश्रोतॄणांसर्वकामदम् ॥१॥ सप्तकोटिगुणाकीर्णोदेवोमार्तंडभैरवः॥
ततःसैन्याधिसङ्घेनमल्लोदैत्यःपरिवृतः ॥ २ ॥ रोषेणतेमहासैन्येमीलितेतुपरस्परम् ॥ सिंह
नादैश्चवीराणांभूतलंबधिरीकृतम् ॥३॥ मिथोमकरतुंडानांसंघट्टैश्चशिरांसिच ॥ फेलुरुद्दोल
यामासुर्ध्वजानामुन्नतांचलाः ॥ ४ ॥ ललाटपट्टान्यमिलन्कुंजराणांसमंततः ॥ आचकर्षुर्म
हावंताःस्वांकुशैरंकुशान्मिथः ॥ ५ ॥ योधाःकुंतैश्चशूलैश्चताडयामासुरद्भुतम् ॥ स्वैरंकूर्चक
चाक्रांताअन्योन्यमतुलोत्सवाः ॥ ६ ॥ शुंडादंडान्कुंजराणांनिर्जघ्नुःकरवालतः ॥ नाडीर्वा
मकराग्रेणधारंधारंमहायशाः ॥ ७ ॥ चिखेलगोलैर्लाक्षायाःकालवालइवाजिगः ॥ मिलत्क
पोलनिनदैःकुंजरैःकुंकुमारुणैः ॥ ८ ॥ कल्पांतइवतत्रासीत्संग्रामेविश्वभीषणे ॥ टणत्कारैश्च
शस्त्राणांभीरूणांव्याकुलात्मनाम् ॥ ९ ॥ विचकेरुर्विस्फुलिंगाःशस्त्रसंघट्टसंभवाः ॥ रणांगणे



रजःकीर्णंखद्योताइवतेनिशि ॥ १० ॥ कुंजरस्कंधसंरूढाःकालसन्नाहसंवृताः ॥ ववर्षुःसमरे
योधाःशरधाराइवांबुदाः ॥ ११ ॥ निजघ्नुःसादयःसादीन्नलैःखड्गैर्भुशुंडिभिः ॥ चक्रिकामु
ष्टिघातैश्चघनकंकणदंडकैः ॥१२॥ आमुष्टियमदंष्ट्राणांप्रहारैर्दारुणैर्मिथः ॥ अत्यासन्नतुरंगा
स्तेकेशाकेशिमहाबलाः ॥ १३ ॥ बाणैरुत्तमलोहाग्रैर्विविधुस्तुरगान्मिथः ॥ रथिनःसारथी
न्रोषाद्रथीनांतुमुलोत्सवे ॥ १४ ॥ बभंजुःशूलशकटान्कृत्तिकाशतशोभितान् ॥ धावत्पदा
तिवृंदानिपक्षैरावृत्यघोटकान् ॥ १५॥ अहोपदातयःशूरालोहसन्नाहसंवृताः ॥ निर्जघ्नुःक्षुरि
काघातैस्तुरगान्सादिनोदितान् ॥ १६ ॥ ज्वलत्फलाभिर्भल्लीभिःकुंजरान्समराजिरे ॥ धनु
र्ज्यास्फालमुक्ताभिस्ताडयामासुरद्भुतम् ॥ १७ ॥ तीक्ष्णशूलप्रहारैश्चरथिनःसहघोटकान् ॥
जीविताशांपरित्यज्यप्रजघ्नुश्चक्ररक्षकान् ॥१८॥ अक्षान्विघटयामासुःकुठारैरतितीक्ष्णकैः॥
सोढारोस्त्रप्रहाराणांस्यंदनानांपदातयः ॥ १९ ॥ केचित्कांश्चिच्चमुसलैःशूलैर्लोहार्गलादि
भिः ॥ समरेचूर्णयामासुःप्रहारारुधिरारुणाः ॥ २० ॥ केचित्खट्वांगसंजातैर्घातैःशीर्षाण्यचू
र्णयन् ॥ तथानिष्कासयामासुर्बहिर्लोचनपिंडकाः ॥ २१ ॥ कांश्चिदेकेहलाग्रैश्चव्याचकर्षुः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पदातयः ॥ तांस्तान्निहन्युरपरेनिस्त्रिंशैरस्त्रचंचुरैः ॥ २२ ॥ केचिच्चक्राणिमुमुचुस्तीक्ष्णधारा
णिपज्जवाः ॥ विसस्रुस्तान्परेशस्त्रैर्नित्यंसंग्रामपंडिताः ॥ २३ ॥ आफलंभल्लघातेननिर्गच्छं
तियथातथाः ॥ जघ्नुःकराभ्यांसुभटाःकांश्चिदेकेपरस्परम् ॥ २४ ॥ ज्वलन्निस्त्रिंशसंजातघातैः
क्षुण्णांगयष्टयः ॥ परेषांघोणदेशस्थंसरोषाद्रुधिरंपपुः ॥ २५ ॥ हाकेचिदूरुसंदेशपीडनादहर
न्नसून् ॥ अन्येषांकोपबहुलाःपतिताह्यवनीतले॥२६॥उदग्रैरंकुशैरुग्रान्पराक्रमवतोद्विपान् ॥
बबंधुःपाशजालेनविषयानिवयोगिनः ॥ २७ ॥ झलझ्झलायमानांशुसन्नाहानुद्यतायुधान् ॥
केचिदुल्लोलयांचक्रुस्त्रिशूलाग्रेणभेदितान् ॥ २८ ॥ सेहिरेपतिताञ्छीर्षेगदाघातान्भ्रमप्रदान् ॥
धीमंतोदुर्वचांसीवतत्प्राणहरणेच्छवः ॥ २९ ॥ हेतिघातछलच्छोणशोणितच्छत्रमंडलाः ॥
स्वामिसंतोषजनकायुयुधुःशस्त्रपाणयः ॥ ३० ॥ सुरांगनानांनैपुण्यंददृशुर्भ्रांतचक्षुषः ॥ वीरा
मुद्गरघातैश्चशतचंद्रंनभस्तलम् ॥ ३१ ॥ प्रस्तराभिंदिपालोत्थाःसुवृत्ताघटिताअपि ॥ लेगुः
परेषांहृदयेकुशब्दाइवदौर्जनाः ॥३२॥ कुठारदुःकुठारैकधाराद्वैधीभवद्वपुः ॥ कीर्तेःपुण्यात्परं
किंचिन्नास्तीतिचावदन्भटाः ॥ ३३ ॥ शितशस्त्रोच्छलद्रक्तपूरस्नातारणेभटाः ॥ अवनींशो



भयामासुरुत्फुल्लाःकिंशुकाइव ॥ ३४ ॥ मुष्टिप्रहारैर्युयुधुःकबंधादिव्यचक्षुषः ॥ स्वामिभक्ति
प्रभावस्यकःपारंवेत्तितत्वतः ॥ ३५ ॥ छिन्नकंठाःकुठाराग्रैर्ननृतुःसुभटारणे ॥ गजग्रीवाधराः
केचिद्गणेशाइवदुर्मदाः ॥ ३६ ॥ रणेविशिरसोवीरादुद्दुवुःखड्गपाणयः ॥ दोर्मूलावर्तमत्युग्रंद
र्शयंतःस्वसाधनम् ॥ ३७ ॥ दर्पादुरसिसंछिन्नास्तिर्यग्यज्ञोपवीतवत् ॥ तेभित्वामंडलंभानोः
सुभटास्त्रिदिवंययुः ॥ ३८ ॥ पतिताःकरिकुंभानांपतितानांरथोपरि ॥ श्रृंगाररसनिर्मग्नमान
साइवतेबभुः ॥ ३९ ॥ नद्योबभूवुरस्त्रस्यशोणफेणावलीयुतः ॥ हयानांरौप्यवर्णानांयासुहंसा
यितंगलैः ॥ ४० ॥ कर्तरीभिःसमायुक्ताःपत्रैर्बाणाविचित्रिताः ॥ तरंगालिषुलोलासुशफ
राइवरेजिरे ॥ ४१ ॥ मांसाशकर्मनिरताःकृतकोलाहलारवाः ॥ इवभांतिमदोन्मत्ताःशाकि
न्योवनदेवताः ॥ ४२ ॥ तोमराणितरंगंतियासुकूर्माइवोन्नताः ॥ शिरांसिहतवीराणांकमल
त्वमुपाययुः॥४३॥कुंजराणांतुरंगाणांयास्वंत्राणिमहांतिच ॥ ग्राहतामाययुःसद्यश्चलंतिचवलं
तिच ॥ ४४ ॥ जग्मुःशैवलतांयासुकेशपाशाःसुविस्तृताः ॥ केशाकेशिमिथोयुद्धेशीर्षेभ्योयेवि
योजिताः ॥ ४५ ॥ आध्मातजठरास्तासांतीरेतीरेविशेरते ॥ परान्नभोजनैस्तृप्ताब्राह्मणाइ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वतुंदिलाः ॥ ४६ ॥ सद्यःशिवप्रभावेणगणानिपतिताअपि ॥ उत्तस्थुःस्वायुधैर्युक्तायथापूर्वर
णांगणे ॥ ४७ ॥ दैत्यानांसुभटाःसर्वेनोत्तस्थुःसमरेहताः ॥ आर्द्राइवमृदःपिंडाःप्राणहीनादि
वंगताः ॥ ४८ ॥ तुष्टुवुःप्रमथाःसर्वेदेवंमार्तंडभैरवम् ॥ जयेतिमुनयस्तोषादवदन्युगपत्तदा
॥ ४९ ॥ अवाद्यञ्जयवाद्यानिकुसुमानिदिवःसुराः ॥ ववुर्षुर्ललितंगीतमगायन्सुरगायकाः
॥ ५० ॥ इतिश्रीब्रह्मांडपुराणेमल्लासुरसैन्यवधोनामदशमोऽध्यायः ॥ १० ॥ सनत्कुमार
उवाच॥अथस्वेनिहतेसैन्येसदैत्योमर्षपूरितः॥ ध्मातनासपुटोमल्लःक्रोधाग्निःश्वासयोगतः।१।
वह्निकुंडेक्षणःकंपमानखड्गस्तुभीषणः ॥ शीघ्रंनुदेतितुरगानुवाचनिजसारथिम् ॥ २ ॥ ततः
सेनाधिपोदैत्यः खड्गदंष्ट्रःप्रतापवान् ॥ सुव्याज्ञापयदीशंस्वंमल्लाख्यमसुरेश्वरम् ॥ ३ ॥ किय
त्सैन्यमिदंदेवग्रासमात्रमिवाधुना ॥ नालंतवप्रकोपायतांबूलंममदीयताम् ॥ ४ ॥ तवमूर्त्तः
प्रतापोहंसंग्रामेजयनिश्चयः ॥ हंतावीरसहस्राणामेकाकीमांनवेत्सिकिम् ॥ ५ ॥ मयितिष्ठति
दैत्येंद्रकथंत्वंयुद्धयसेस्वयम् ॥ क्षणंस्थित्वाद्यभृत्यस्यपश्यमेरणकौशलम् ॥ ६ ॥ अथासौदैत्य
राजेनखड्गदंष्ट्रःसमीरितः ॥ स्वामिसन्मानतोषेणययौयुद्धायसन्मनाः ॥ ७ ॥ वाजिनांपंच



भिर्लक्षैःरथैस्तद्विगुणैःसह ॥ चतुर्गुणैश्चकरिभिर्गजारूढश्चशस्त्रवान् ॥ ८ ॥ वाद्यदुंदुभिनिर्घो
षसिंधुपानस्फुरन्मदः ॥ कृतबंदीजनस्तोत्रश्चतुश्चामरवीजितः ॥ ९ ॥ तमायांतंसमालोक्य
समादिष्टःषडाननः ॥ युध्यस्वेतिमहेशेनखड्गदंष्ट्रेणसत्वरम् ॥ १० ॥ प्रसादयेत्युवाचेशंसेनया
निजयावृतः ॥ अनेकशस्त्रयुक्स्वामीचतुरंगपरिवृतः ॥११॥ मयूरपिच्छचमरैःसेवितच्छत्रमं
डलः ॥ मयूरवाहनस्तत्रतस्थौससमरांगणे ॥१२॥ आवयोःसमरोयस्मात्सेनाभ्यांकिंप्रयोज
नम् ॥ युद्धस्वेत्यवदद्वाक्यंखड्गदंष्ट्रःषडाननम् ॥ १३ ॥ बालस्त्वंशूलिनःसर्वसैन्येनकिलरक्ष्य
से ॥ संग्रामायससैन्यस्त्वंनभृत्यशरणावयम् ॥ १४ ॥ याचस्वपोलिकांदुर्गांनासाभ्यांजहि
रेकफम् ॥ नवनीतादनेशक्तःकथंयुद्धायवल्गसे ॥ १५ ॥ उत्संगंयाहिरेमातुर्मुंचमुंचाजिसंभ्र
मम्॥कोमलानितवांगानिनिर्दयाममभल्लयः ॥१६॥ इतितस्यवचःश्रुत्वाचुकोपसुतरामसौ ॥
विव्याधदैत्यंबाणानांसहस्रेणासिदंष्ट्रकम् ॥ १७ ॥ तेनतेंखड्गचालेनबाणाःछिन्नास्तुलाघ
वात्॥ विव्याधचससेनान्यंबाणैःशतसहस्रशः ॥१८॥ बाणजालंसमायांतंवीक्ष्यासौपार्वतीसु
तः ॥ शक्त्यानिवारयामासभ्रमत्याशिखिवाहनः ॥ १९ ॥ ततःसकुंजरारूढःशफरीव्याधल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षितः ॥ जघानषण्मुखंबाणैरुच्चस्थःसमरेबली ॥ २० ॥ व्यर्थीकृतंमयूरेणसमुत्पत्यनभस्त
लम् ॥ संधानंतस्यदैत्यस्यस्वामिनाधिष्ठितेनच ॥२१॥ संधानंव्यर्थतांमत्वावीक्ष्याकाशेतथो
न्मुखम् ॥ जघानकेकिनंसद्यःशरेणसरुषंगले ॥२२॥ ततःकोपेनपूर्णोसावविध्यत्तस्यकुंजरम् ॥
निमज्जत्करिपिच्छाग्रमर्द्धचंद्रेषुणालघु ॥ २३ ॥ षण्मुखस्यधनुर्वंशंक्षुरप्रेणाशुगेनच ॥ चिच्छे
दप्रोन्नतंदैत्योध्वजंभल्लासिधारया ॥ २४ ॥ रत्नैर्विनिर्मितांस्तुंगान्किरीटानाशुगैःक्षणात् ॥ ष
ड्भिस्तद्द्विगुणैःकर्णकुंडलानीषुजन्मनः ॥२५॥ व्याकुलीभूतचित्तोसौबाणजालैरभूत्तदा ॥
ततःकोपेनमहतास्फुरद्दंष्ट्राग्रभीषणः ॥२६॥ मुमोचशक्तिमत्युग्रांशतघंटाविलंबिनीम् ॥ तां क
ल्पांतज्वलज्वालानिर्मितामिवदुर्धराम् ॥२७॥ दैत्याधमसहस्वेतिसातेनाशुगवृष्टिभिः ॥ वार्यमा
णापिहृदयेऽपतत्तस्यचपापिनः ॥ २८ ॥ विह्वलःशक्तिघातेनमुमोचासून्मदोद्धतः ॥ पलाय
मानंतत्सैन्यंमारयामासुरेश्वराः ॥ २९ ॥ केचिन्मुसलघातेननितरांपीडितोरसः ॥ रक्तंचरा
क्षसावेमुर्दिग्भ्रांताभ्रांतचेतसः ॥३०॥ परिघाघातसंभ्रांतमानसाराक्षसाःपरे ॥ आसन्नमरणा
मूर्च्छामाययुस्तत्रसंगरे ॥ ३१ ॥ पतितानांचशस्त्राणांधाराभिर्गलितांघ्रयः ॥ केचिद्धावंतिस



मरेभीरवस्तुपराङ्मुखाः ॥ ३२ ॥ पपुःस्वेदजलंकेचित्तुरंगाणांचदंतिनाम् ॥ भंगभीतितृषा
क्रांताःकोणपाजीविताशयाः ॥ ३३ ॥ इतिश्रीब्रह्मांडपुराणेखड्गदंष्ट्रवधोनामएकादशो
ऽध्यायः ॥ ११ ॥ सनत्कुमार उवाच ॥ हतेसेनाधिपेतस्मिन्ससैन्येऽथशिवात्मना ॥ कोपेन
राक्षसांस्वामीहेमदंडैश्चचामरैः ॥ १ ॥ वीज्यमानोरथारूढःशस्त्रविद्याविशारदः ॥ उल्कामु
खोमहावीर्यःक्रोधेनरणमाययौ ॥ २ ॥ वाजिनांलक्षविंशत्यारथानांकोटिभिर्युतः ॥ कोट्यर्ध
कुंजरैर्युक्तोह्यसंख्यैःपदगैर्वृतः ॥ ३ ॥ तमालोक्यकृतोत्साहंसमराभिमुखंशिवः ॥ गणानाम
धिपंदेवंनुनोदरथिनंतदा ॥ ४ ॥ दैत्येनाभिहितःसोथकिंतेयुद्धेनबालक ॥ मधुराणिचखाद्या
निमोदकप्रमुखानिच ॥५॥ कुमारादसुखंगेहेखाद्यंशस्त्राणिसंगरे ॥ सतेनव्याहृतःपश्चाद्वाचा
लत्वमलंतव ॥ ६ ॥ दैत्यसेनासुवृत्तान्वोमोदकान्भक्षयाम्यहम् ॥ शिवस्यबालकोनूनंभवतामं
तकोधुना ॥७॥ इत्युक्तोराक्षसःकोपात्प्रज्वलद्दहनेक्षणः ॥ मुमोचतीक्ष्णधाराणांशराणांशतम
द्भुतम् ॥ ८ ॥ ताञ्छरान्परशुघातेनगणेशोलीलयाऽच्छिनत् ॥ संदधेसौततोदैत्यःशराणांद्वि
सहस्रकम् ॥ ९ ॥ तेशरावाजिनामंगेकेचिन्मग्नाःसपत्रकाः ॥ उन्मार्गगामिनोभूवन्हयाःसार

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

थिनावृताः ॥ १० ॥ अक्षोबभंजमकरश्चूर्णीभूतोभवत्तदा ॥ हाहाकृतंसुरैस्तत्रतल्लज्जाको
पपूरितः ॥ ११ ॥ विव्याधतुरगांस्तस्यबाणैःसारथिनंध्वजम् ॥ तंचदैत्यंगणाध्यक्षोविरथं
प्राकरोत्तदा ॥ १२ ॥ लोहभारसहस्रस्यगदांजग्राहदानवः ॥ भ्रमंतींतांकुठारेणचिच्छेदचग
णाधिपः ॥ १३ ॥ गृहीतुमुद्यतःशक्तिंयावत्क्रोधान्महासुरः ॥ तावज्जघानगणपःसदंतेना
शुमुष्टिना ॥ १४ ॥ तावत्सनरसिंहोभूल्लिलेखनखरैःकरम् ॥ तस्यदंतप्रहारेणप्राणाञ्जग्राहवि
घ्नराट् ॥ १५ ॥ शिरोभिर्व्यात्तनयनंललज्जिह्वंचलत्सटम् ॥ छिन्नंपदातिघातेनपपातविशि
राभुवि ॥१६॥ विलोक्यतंहतंदैत्यंतत्सैन्यंयोद्धुमुत्सुकम् ॥ अभूत्तस्यगणैःक्रोधाद्युद्धेनीतंयम
क्षयम् ॥१७॥ तुरगंकुंजरमहारथःसारथिभिःसह ॥ अथतंसमरेदृष्ट्वादीर्घनिद्रामुपागतम् ॥१८॥
उल्कामुखंमहासैन्यंसमरेरविलोचनः ॥ अशीत्यावाजिलक्षाणांरथकोटिद्वयेनच ॥ १९ ॥
कुंजराणांचतुःषष्ट्याऽसंख्येयैःपदगैर्वृतः ॥ अयुतैर्जयवाद्यानांसहस्रेणोन्नतध्वजैः ॥२०॥ स्वा
मिसन्मानतोषेणस्फुरन्नासापुटद्वयः ॥ स्फूर्जच्चंडभुजादंडःस्वर्णदंडैश्चवीजितः ॥२१॥ चाम
रैःकुंतलोमाख्यःसंग्रामायसमाययौ ॥ तमायांतंशिवोवीक्ष्यदिदेशजयनंदिनम् ॥ २२ ॥ प्राप्त



वंतंमहेशस्यसारूप्यंनागभूषणम् ॥ त्रिनेत्रंपंचवक्त्रंचचंद्रंमुक्ताद्युतिप्रभम् ॥२३॥ त्रिशूलादीनि
शस्त्राणिदधानंचंद्रशेखरम् ॥ कांचनस्यंदनारूढंसंग्रामोत्सवपीवरम् ॥२४॥ तमुवाचशिवाकारं
त्वंमहेशोसिहेसुर ॥ तेनोक्तंकृपयाशंभोःस्वरूपंप्राप्तवानहम् ॥२५॥ किंकरःशंकरस्याहंत्वद्वधा
र्थमुपागतः ॥ तमाहकुंतलोमासावमरत्वंगतंतव ॥२६॥ रेरेदैत्यकृतांतोहंकस्त्रातातेद्यरक्षतु ॥
तमित्युक्त्वाललाटस्यस्वेदेनज्यांममर्दच ॥ २७ ॥ तत्रसंधायबाणानांशतंलक्षप्रसूतिमत् ॥
आकर्णंधनुरापूर्यकुंतलोम्निमुमोचसः ॥२८॥ खट्वांगचालनोच्छालैःशरांस्तान्सनिराकरोत् ॥
जयनंदीगणःशंभोर्धनुरादायसुप्रभम् ॥ २९ ॥ संदधेबाणमत्युग्रंदिग्धंहालाहलेनच ॥ आपू
र्योरस्थलंस्फालंतेनदैत्यमताडयत् ॥ ३० ॥ वार्यमाणोपिबाणानांशतैर्वक्षस्थलेऽपतत् ॥ निर्ग
तःपृष्ठरंध्रेणबाणेनानेनसव्यथम् ॥३१॥ अथासौशरजालेनत्रासयामासनंदिनम् ॥ ससैन्यंस
मरेतत्रयुद्धमंत्रप्रभाववान् ॥ ३२ ॥ पराङ्मुखोभवन्नंदीरथाश्वैर्वलितंक्षणात् ॥ सारथिःशरनि
र्भिन्नःपपातधरणीतले ॥ ३३ ॥ धनुर्मुष्टियुतंसद्यश्चिच्छेदध्वजमुन्नतम् ॥ तेनद्रवद्रथेनाब्धिः
क्षोभितोमुखनोदनात् ॥ ३४ ॥ पलायमानंदेवानांसैन्यंचूर्णीचकारसः ॥ मर्दनैश्चक्रनेमीनां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वांगकुंताहतैर्गजान् ॥३५॥ घातयामासतुरगाञ्छस्त्रपातैश्चदारुणैः ॥ एवंसंक्षीयमाणेऽथसै
न्येनंद्यवलद्रणे ॥ ३६ ॥ क्रोधेनपूरितःस्वांतःसंवर्त्ताग्निविलोचनः ॥ अन्यसारथिनायुक्तःसिं
हनादंचकारसः ॥ ३७ ॥ तेनसर्वंहतंसैन्यंदैत्यानांशरवृष्टिभिः ॥ विव्याधकुंतरोमाणमाग्नेये
नाशुपत्रिणा ॥ ३८ ॥ सपत्रीशोषयामासामृतंतस्यहृदिस्थितम् ॥ ततःसविह्वलोदैत्योभ्रम
च्चक्षुरभूत्तदा॥३९॥हतेतस्मिन्दुराधर्षेश्रीमताजयनंदिना॥पुष्पाणिमुमुचुर्देवाआशीर्वादानृषी
श्वराः॥४०॥इतिश्रीब्रह्मांडपुराणेउल्कामुखकुंतलोमवधोनामद्वादशोऽध्यायः॥१२॥सनत्कु-
मार उवाच ॥ ततोहतेषुदैत्येषुसेनानीसैनिकेषुच ॥ यद्वृत्तंसंगरेतस्मिञ्छ्रूयतांतदृषीश्वराः ॥
॥ १ ॥ मणिमल्लौरुषापूर्णौरणवाद्यमहोत्सवे ॥ तावुभावपिसंग्रामेतिष्ठतांक्रोधनिर्भरौ ॥२॥
उवाचभ्रातरंमल्लंमणिःक्रोधोद्धुरस्तदा ॥ दैत्यराजमहाभाग्योदयंमेपश्यसंगरे ॥ ३ ॥ यःस्वयं
जगतांनाथःशक्रादिसुरपूजितः ॥ सयोद्धाद्यजयंतोस्मिल्लॅभेवानलभेथवा ॥४॥ पराजयजया
भ्यांमेजयएवसुनिश्चितः॥इत्युक्त्वासिंहनादेनजगर्जमणिकासुरः।५। त्रैलोक्यंपूरयामासस्वश
ब्दप्रतिरावतः ॥ चेलुःकैलासशिखरेबद्धसिद्धसमाधयः ॥ ६ ॥ इंद्रानांकिन्नराणांचदृढान्या



लिंगनानिच ॥ कंठंमुरारेःकमलालिलिंगप्रतिशब्दभीः ॥ ७ ॥ सिंदूरोद्धूलनशिरामायावी
तुंगमूर्तिमान् ॥ लिखन्रत्नकिरीटस्यकोट्यावारिदमंडलम् ॥ ८ ॥ शोभितोबाहुविंशत्यारत्न
चंदनचर्चितः ॥ तडिल्लक्षप्रतीकाशकर्णकुंडलमंडितः ॥ ९ ॥ नीलमेघावलिच्छायसर्वायुधल
सत्करः ॥ जपाकुसुममालाभिर्युक्तऊर्ध्वभुजार्गलः ॥ १० ॥ पदातिर्गिरिसारैःस्वैःपादन्यासैर्म
हीतलम् ॥ पदेपदेविनमयन्योद्धुमभ्याययौरणे ॥ ११ ॥ तमभ्यागतमालोक्यश्रीमन्मार्तंडभै
रवः ॥ प्रहसन्वारयामाससंग्रामायगणान्निजान् ॥ १२ ॥ मार्तंडभैरव उवाच ॥ रेरे
गणाःक्षणंयुद्धमीक्षध्वंखलुमामकम् ॥ शौर्यंवीक्षामहेचास्यराक्षसस्यतथाबलम् ॥ १३ ॥
बभूवभैरवस्तद्वत्पदातिःसमरेच्छया ॥ सिंहनादेनमहताक्षोभयामासरोदसी ॥ १४ ॥
तमुवाचमहादैत्यःकेनत्वमभिवंचितः ॥ भैक्ष्यंयाचसदाश्रेयोभिक्षूणांसमरेणकिम् ॥ १५ ॥
श्रुत्वेतितस्यवचनंत्रिनेत्रःक्रोधपूरितः ॥ दुद्रावतंदुरात्मानंस्फुरन्नासापुटद्वयः ॥ १६ ॥
लोहभारसहस्राणांगदयाकाशतुंगया ॥ जघानमूर्ध्निसहसाजहौतांसचखेटकात् ॥१७॥ अवी
वदच्चयोद्धारंतुच्छंभैरवतेबलम् ॥ उत्तुंगोसिचपीनोसिनिःसारत्वान्महालघुः ॥ १८ ॥ तदाक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्ण्यवचस्तस्यपुनारोषान्मदोद्धतम् ॥ जिहिंसबाणैर्वेगेनसहस्रप्रसवक्षमैः॥१९॥ तानागताञ्छ
रान्वीक्ष्यकरवालेनसोऽच्छिनत् ॥ सम्यक्जितेंद्रियोयोगीचित्तेनविषयानिव ॥ २० ॥ ततःस
राक्षसःक्रूरोक्षुरप्राणांशताधिकम् ॥ सहस्रंसंदधेज्यायांशराणामग्नितेजसाम् ॥२१॥ भस्मीच
कारतान्बाणान्हुंकारेणमहेश्वरः ॥ तमताडयदुग्रेणकिरीटेचमहेषुणा ॥ २२ ॥ उज्जग्मुस्तत्रर
त्नानिखनित्रेणाकरेयथा ॥ अभ्यधावत्ततोदैत्यंसंहर्त्ताभैरवःस्वयम् ॥ २३ ॥ चंद्रहासेनती
क्ष्णेनरंहसास्यशिरोऽच्छिनत् ॥ तावत्सशरभास्योभूद्भुजंशंभोर्ददंशच ॥२४॥ ततःकृत्तिकया
शंभुस्तंजघानरिपुंरुषा ॥ शस्त्रिकांतांमुखेनैवजग्राहघुटिकामिव ॥२५॥अथशंभुस्त्रिशूलेनछेद
यामासतंजवात् ॥ उरस्थलंपृष्ठवंशंयथाभिद्यतितत्क्षणात् ॥२६॥ दैत्येशोथाभवत्तुंगस्तुरंगव
दनःक्षणात् ॥ चकारहेषामत्युग्रांजगत्क्षोभविधायिनीम् ॥२७॥ अर्धचंद्रेणबाणेनग्रीवांतस्या
च्छिनच्छिवः ॥ तस्याभूत्कौंजरीग्रीवाशुंडादंडविराजिता ॥२८॥ तांजघानकुठारेणतीक्ष्ण
धारेणमूर्धनि॥ततोऽसौतुरगारूढःसाद्यभूदुग्रखड्गवान् ॥२९॥निहन्यमानःशस्त्रौघैर्दुर्धरोऽसौ
महेश्वरम् ॥ जघानकरवालेनभुजमध्येमदोद्धतः ॥३०॥ तेनभूषणनागेंद्रःप्रहारेणचखंडच ॥

ततोमुमोचसहसावह्न्यस्त्रंगिरिजापतिः ॥ ३१ ॥ सतेनव्याकुलीभूतोपपाताश्वेनसंयुतः ॥ ज
लेयत्रतुरंगाख्यमभूत्तीर्थंसुपुण्यदम् ॥३२॥ अथनाराचतीक्ष्णाग्रैर्ब्रह्मांडंसमपूरयत् ॥ दैत्यरा
जःशिवंलक्षीकृत्यसर्वंनिरंतरम् ॥ ३३ ॥ अंगेतस्यशराःशंभोर्विश्वनाट्यनटस्यच ॥ ललाटप
ट्टेमुकुटेकपोलेकुंडलद्वये ॥३४॥ भुजेषुवक्षसिक्रूरालग्नामग्नाःसमंततः ॥ स्कंधयोर्नाभिदेशेच
ग्रीवास्कंधद्वयांतरे ॥३५॥ मुंडमालाशरैर्भिन्नाशंभोर्दैत्यस्यसंगरे ॥ मृतस्यमरणंप्राप्तमहोचि
त्राविधेर्गतिः ॥ ३६ ॥ क्रुध्यंतिशरनिर्भिन्नाःशिवभूषाभुजंगमाः ॥ दैत्येनामंत्रिताःकालाइव
रेजुःफणान्विताः ॥ ३७ ॥ अदुनोच्चंद्रमाःशंभोर्जटाजूटगतस्तदा ॥ दैत्यराजस्यबाणैर्हिवैर
स्थानस्थितेःफलम् ॥ ३८ ॥ अथतंदुर्धरंदृष्ट्वामहावीरंमणिःशिवः ॥ ज्वलज्ज्वलनसंकाशंशू
लमुग्रंमुमोचह ॥३९॥ तदाहतंपरशुनाचक्रखड्गशरोत्करैः ॥ निवार्यमाणोदैत्येनप्राप्तंकर्मेवपू
र्वजम् ॥४०॥ तेनोरविसिनिर्भिन्नस्त्रिशूलेनसदैत्यराट् ॥ पपातविह्वलोभूमौभ्रमल्लोचनपुत्रिकः
॥४१॥ तदामूर्ध्निपदंशंभुर्यावदुच्चालयत्यहो ॥ दैत्येनपरयाभक्त्यास्थापितंनिजमूर्धनि ॥४२॥
क्वयास्यसिचदेवेशवैरेणपरितोषितः ॥ दृष्टोऽस्यंतेरणेमृत्युस्त्वांनमुंचामिसर्वथा ॥४३॥ निज



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शौर्येणसंतुष्टंनुनावजगदीश्वरम्॥दृष्टंसाक्षात्कृपापात्रीभूतोऽसौदैत्यपुंगवः॥४४॥मणिरुवाच॥
नमस्तेभूतनाथायसर्वांतर्यामिणेनमः ॥ नमोरुद्रायरौद्रायनमस्तेदानवारये ॥ ४५॥ नमःशु
द्धायशांतायकैवल्यपतयेनमः ॥ नमोरत्नावलीचंचन्मुकुटायासिपाणये ॥ ४६ ॥ नमोदेवाय
महतेनमोगंगाप्रियायते ॥ नमःकमलकिंजल्कपुंजपिंजररेतसे ॥ ४७ ॥ चंद्रचंचत्कलामौले
त्रिनेत्रायनमोनमः ॥ नमोदयासमुद्रायदेवदेवायशाश्वते ॥ ४८ ॥ मयूरपिच्छचमरैर्वीज्यमा
नायतेनमः ॥ सप्तकोटिगणाकीर्णसैन्यायशिवतेनमः ॥ ४९ ॥ नमस्त्रिशूलहस्तायनमस्तेत्रिगु
णात्मने ॥ नमःपरमहंसायनमःपात्रधरायते ॥ ५० ॥ नमःकारुण्यपूर्णायनमस्तेस्वस्तिकारि
णे ॥ नमोभक्तजनानंदविधानविधयेनमः ॥ ५१ ॥ नमःपरमकैवल्यदायिनेविश्वधारिणे ॥
डमड्डमरुडांकारकारिणेतेनमोनमः ॥५२॥ मार्तंडभैरव उवाच ॥ तुष्टोहमेकभावेनमणेभक्त्या
चपूर्णया ॥ वरंवृणीष्वचित्तस्थंतुभ्यंदास्यामिनिश्चितम् ॥५३॥ मणिरुवाच ॥ यदितुष्टोऽसि
देवेशकृपयामणिसूदन ॥ मत्कृतंयद्भवत्स्तोत्रममुष्यपठनान्नृणाम् ॥ ५४ ॥ जायतेलक्ष्मीरतु
लादानाद्विश्वोपकारिणी ॥ सर्वभोगप्रदापुत्रवाजिवारणसुंदरा ॥ ५५ ॥ मोक्षश्चांतेरणेशौर्य



वाणीनवरसोज्ज्वला ॥ मच्छिरस्तवपादाधोभूयाद्देवनिरंतरम् ॥५६॥ तुरंगसहितंरूपंमदीयं
तवसन्निधौ ॥ श्रीमार्तंडभैरव उवाच ॥ मणेवृत्तंत्वयायद्यत्तत्तत्तेभवतुध्रुवम् ॥५७॥ त्वंयाहिप
रमंमोक्षंशाश्वतंममशासनात् ॥ शृण्वतामावयोयुद्धंसिद्धयःसंतुसर्वदा ॥ ५८ ॥ इतिश्रीब्रह्मां
डपुराणेमणिकासुरवधोनामत्रयोदशोऽध्यायः ॥१३॥ सनत्कुमार उवाच ॥ अथतुष्टोमहादे
वोमणेर्भक्त्याप्रसन्नधीः ॥ भ्रातातस्येतिकृपयामल्लंरक्षितुमिच्छति ॥ १ ॥ उवाचविष्णंदेवेशं
मल्लमाज्ञामयेतिच ॥ तंगत्वाब्रूहिपातालंयाहिशेषैर्जनैर्वृतः ॥२॥ भवंतुसर्वेमुनयःस्वाश्रमेऽध्य
यनोत्सवाः ॥ प्रभवंतुसुराःक्ष्मायांप्रतिमापूजनानिच ॥ ३ ॥ संतुयज्ञक्रियाविप्रानिर्व्याकुलि
तमानसाः ॥ दीव्यंतुसर्वेराजानःपालयंतुमहीतलम् ॥ ४ ॥ यज्ञभागभुजोदेवाःसंतुत्रिदिववा
सिनः ॥ नोचेत्वामधुनायुद्धेभैरवोऽयंहनिष्यति॥५॥ इतिशंभोर्वचःश्रुत्वादैत्यराजंजगामसः॥
एकाकीगजमारूढोविशस्त्रःशांतमूर्तिमान् ॥ ६ ॥ उवाचतंमहादैत्यंमल्लंमल्लेनपूजितः ॥ वि
ष्णुरुवाच ॥ नीतारणेक्षयंदैत्याबहवस्तेतथाबलम् ॥ ७॥ अन्येऽपिभ्रातरःपुत्राःसगोत्रामित्र
बांधवाः ॥ शालकाःश्वशुराःक्रूराःसेवकाहृदयंगमाः ॥ ८ ॥ प्रमत्तादंतिनःप्रौढावाजिनश्चम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नोजवाः ॥ अनर्घ्यरत्नघटिताशकटारथिभिःसह ॥ ९ ॥ पदातयोप्यसंख्येयाभ्राताचप्राणव
ल्लभः ॥ त्वयाघातयितायुद्धेदुर्मदांधेनमल्लरे ॥१०॥ इदानींशरणंगत्वादेवंमार्तंडभैरवम् ॥ शी
घ्रंरसातलंयाहिशेषैर्दैत्यैःपरिवृतः ॥ ११ ॥ प्राणानवनिजान्मल्लक्रोधीमार्तंडभैरवः ॥ क
ल्पांतकेलिरसिकस्तेनयोद्धुंनचार्हसि ॥ १२ ॥ तस्यक्रोधानलेदैत्यमातेदेहोहुतिर्भवेत् ॥ प्र
त्ययेपिचसंजातेमापुनर्विषभक्षणम् ॥ १३ ॥ प्रह्लादस्यकुलोत्पन्नस्तस्मात्त्वांयोजयाम्यहम् ॥
हितायकृपयामल्लमद्वचःशृणुसर्वथा॥१४॥मल्लासुर उवाच ॥ भगवंस्त्वामहंयाचेतन्मेदेहिप्रसा
दतः ॥ स्थातव्यमस्मिन्भवतायावद्योत्स्याम्यहंक्षणम् ॥ १५॥ तत्सैन्यंसशिवंवक्रेजानीहिप
तितंमम ॥ त्वांरक्षामियतःपूज्यःपूर्वजानांगदाधरम् ॥१६॥ स्थित्वास्यशिखरेतुंगेयुद्धंपश्यम
मेशितुः ॥ शंभुनातद्गणैर्वापिभ्रातासैन्यसमावृतः ॥ १७ ॥ गिलितस्त्वंकमृगयेप्रज्वलज्जठरा
नलः ॥ निदार्यजठराण्येषांतद्रक्ततटिनीषुच ॥१८॥ नावगाहेभृशंयावत्तावद्देहोनशाम्यति ॥
बुभुक्षितानिशस्त्राणिदेवशोणितपानिमे ॥ १९ ॥ तृप्तिंनयामिपरमांनयावज्जीवितेनकिम् ॥
सुरदेहोच्छलद्रक्तबिंदुसिक्तमिवांबरम् ॥२०॥ यावन्नकुर्वेगोविंदसुखंतावल्लभेकथम् ॥ भैरव



श्चगणास्तस्यकिंयोत्स्यंतिमयाहरे ॥ २१ ॥ तृणानिपावकेनैवशुष्काणिबलवत्यपि ॥ अद्य
निस्त्रिदशःस्वर्गःपृथ्वीनिर्मानुषापिच ॥ २२ ॥ रसातलमनागंचक्रुद्धेमयिसुरांतके ॥ दंष्ट्राच
र्वणनिर्घोषंनिर्जरान्मयिखादति ॥ २३ ॥ भ्रातृशोकज्वलच्चितेनालंपानायसागरः ॥ श्रीना
रायण उवाच ॥ रेमल्लशृणुमेमंत्रंवैतसींवृत्तिमाश्रय ॥ २४ ॥ पतंगवृत्तौमरणंनीतिदोषास्पदंवृ
था ॥ मल्लासुर उवाच ॥ निजप्राणभयात्केचित्सत्यंमुंचंतियेजनाः ॥ २५ ॥ पच्यंतेकुंभिपा
केषुनरकेषुसमाःशतम् ॥ इत्याद्यनेकशपथान्कथयामासदैत्यराट् ॥ २६ ॥ शूराणांतृणवत्प्रा
णाःकृतनिश्चयिनांरणे॥२७॥इतिश्रीब्रह्मांडपुराणेदैत्याभिगमनंनामचतुर्दशोऽध्यायः॥१४॥
सनत्कुमार उवाच ॥ विष्णुनावार्यमाणोऽपिक्रोधाक्रांतःसदैत्यराट्॥संग्रामाययौमल्लोजयवा
द्यमहोत्सवः ॥ १ ॥ सर्वशस्त्रास्त्रसंयुक्तःसर्वमायान्वितोरथी ॥ हरिचंदनकस्तूरीकुंकुमागरुलेप
नः ॥ २ ॥ सिंदूररेणुनिकरसंराजन्मूर्धजच्छटः ॥ आमेघमंडलतनूर्नीलजीमूतसन्निभः ॥३॥
रचितःकालकूटेनधात्राकिंकज्जलेनवा ॥ पतद्ग्रोमाश्रयस्तंभःशक्रनीलमयोयथा ॥ ४ ॥ च
लच्चामरवृंदेनतुंगोनीलगिरिर्यथा ॥ रत्नभूषणमालाभिर्मेरुशृंगाकृतिर्बभौ ॥ ५ ॥ उत्तुं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गेनकिरीटेनलिलेखजलदावलिम् ॥ तस्यतोडरडंकारैःक्षुभितःक्षीरसागरः ॥ ६ ॥ कृत
बंदिजनस्तोत्रःसमरोत्सवपीवरः ॥ महाकालस्ययोद्धासौवर्णनातिगसद्यशः ॥ ७ ॥ सं
ग्राममेदिनींप्राप्यसिंहनादंचकारसः ॥ तेनमेरुस्थनक्षत्रमालातलमिवागता ॥ ८ ॥ कैला
सेभीतिकंपेनपार्वत्यामुकुटोऽपतत् ॥ वाडवःसेवतेचाब्धितत्कंपशमनेच्छया ॥९॥ भूमिभार
भराक्रांतःशेषोपिचलनोद्यतः ॥ गिरयःकंपिताःसर्वेससिद्धमिथुनास्तदा ॥१०॥ उल्बणेनस
सैन्येनबहुलेनपरिवृतः ॥ तस्यतत्सैन्यमालोक्यघृतमारीसमुत्थिता ॥ ११ ॥ मुष्टिमादाय
वेगेनभ्रामयंतीहकुंजरान् ॥ कुंजरेणजघानैवतुरंगेणतुरंगमान् ॥ १२ ॥ हयान्सारथि
युक्तांश्चरथांश्चिक्षेपसामुखे ॥ पलायमानान्पदगाञ्जिह्वयालंबयावृतान् ॥ १३ ॥ चचर्वचम
हारावैःसशस्त्रान्दैत्यपुंगवान् ॥ दुर्धराञ्छस्त्रसंघातैर्माययापिह्यनावरा ॥१४॥ चूर्णीकृतंशस्त्र
लोहंदशनैर्वज्रसन्निभैः ॥ भस्मीकृतंजाठरेणतस्यास्यात्तद्रसायनम् ॥ १५॥ ववृधेबलमत्युग्रं
परापुष्टिश्चतत्क्षणात् ॥ तामाहक्षोभितोदैत्यःपुष्टासिपशुभक्षणात् ॥ १६ ॥ सैन्यग्रासेनहेमा
रिग्रासमात्रंममासिह ॥ दैत्येनाभिहितासैवंरूपंदिव्यंबभारच ॥ १७ ॥ ववर्षसायकैर्दैत्यंमेघ



मालेवपर्वतम् ॥ नाल्पामपिव्यथांचक्रुस्तेबाणादैत्यपुंगवे ॥ १८ ॥ रणकंडूतिकंडूलेकंडूशांत्यै
वचाभवत् ॥ उद्भ्राम्यगदयाव्योम्निजघानसहसाचताम् ॥१९॥ तांगदातलहस्तेनधृत्वाशूलंमु
मोचतम् ॥ तंशूलंमुष्टिनादायतांचचिक्षेपदैत्यराट् ॥ २० ॥ अताडयत्साखड्गेनस्कंधेदैत्यंचरं
हसा ॥ सबाहुःपतितस्तस्यस्कंधेनसहभूतले ॥२१॥ सुस्रावशोणितंतत्रशोणतीर्थमभूत्तदा ॥
अन्योपिबाहुरजनिदैत्यराजस्यतत्क्षणात् ॥ २२ ॥ तथाकटककेयूरमुद्रिकाखड्गमंडितः ॥
अथसाभैरवंनादंविधायगगनंगता ॥२३॥ तस्माद्वर्षसमरेशिलावृष्टिंमहोपलाम् ॥ उत्पपात
सदैत्येंद्रोव्योम्नस्तावन्महींगतः ॥२४॥ भूयमभ्यागतोदैत्यःशरैस्तामप्यताडयत् ॥ अमोघा
स्तेशरास्तस्यबिभिदुःसहसावपुः ॥२५॥ शतंशिरसिबाणानांकुचयोःसप्तविंशतिम् ॥ ग्रीवा
यामुरसिस्कंधेशतानिचपृथक्पृथक्।२६।नाभिदेशेललाटेचवक्षस्यूर्वोश्चजानुनोः ।असंख्येयाः
शरालेगुरितितांविह्वलीकृताम् ॥ २७ ॥ विलोक्यशंभुःसमरेदैत्यस्याभिमुखोऽभवत्॥हय्यंगवी
नराशेश्चकल्पांतदहनोयथा ॥२८॥ इतिश्रीब्रह्मांडपुराणेघृतमारीयुद्धवर्णनं नामपंचदशोऽध्या
यः॥१५॥सनत्कुमार उवाच ॥ मार्तंडभैरवंदेवंव्याजहारासुरस्तदा॥शौर्यसत्वप्रमत्तोसौयाही

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिनिजपर्वतम् ॥१॥ मदीयंभवदीयंचदैवंतुलयहेशिव ॥ त्वमेकाकीवृषारूढःसेवितःकुंजरैरिह ॥ २ ॥ मयिदिव्यानिवासांसित्वयिचर्मास्रगाविलम् ॥ मय्यस्तिकांचनीभूषाकालास्त्वयि भुजंगमाः ॥३॥ सुवर्णरजसामिश्रंलेपनंचंदनस्यमे ॥ प्रेतास्थिचूर्णसहितंभस्मतेप्रेतभूमिजम् ॥४॥एकातेपिपुराणास्त्रीमेसहस्राणियोषिताम्॥इदानींमत्परःकोऽस्तिविभुस्त्रिभुवनेश्वरः॥५॥ योद्धुंत्वयेतिसहसाब्रुवाणःकिन्नलज्जसे ॥ उन्मत्तकरिणांस्पर्द्धांदर्पात्पोत्रीकरोतिकिम् ॥ ६ ॥ अलंसागरपानायमशकेनपिपासुना ॥ प्रलयाग्निमहाज्वालाकिंपतंगेनशाम्यति ॥ ७ ॥ किं कल्पमेघनाशायकल्पतेव्यजनानिलः ॥ मेरोरुन्मीलनोद्योगंकुरुतेकिंमहोंदुरुः ॥ ८ ॥ वदंत मितिदैत्येंद्रंजघाननिशितैःशरैः ॥ दुर्वाक्यकोपसंपूर्णःशिवोमार्तंडभैरवः ॥ ९ ॥ शरांस्तान्प ट्टिशेनैवनिवार्यदनुजेश्वरः ॥ उदग्रकरवालोसौशिवंदुद्राववेगवान् ॥ १० ॥ तमायांतंसमालो क्यदुर्धरंधीरमानसः ॥ तीक्ष्णाग्रैःसायकैरुग्रैस्ताडयामासभैरवः ॥११॥ आकर्तरीमुखंबाणा मग्नास्तेतुपिनाकिनः ॥ दैत्यांगेषुनमेनेसौनखक्षतरुजामपि ॥ १२ ॥ अथशंभुःसमुत्पत्यदर्प धाराशिनाजवात् ॥ बाहौवामेमहादैत्यमताडयदनंतरम् ॥१३॥ अवादयड्डमरुकमाब्रह्मांडम

हारवम् ॥ शिवश्चसिंहनादेनजगर्जदितिजेश्वरः ॥ १४ ॥ तयोःप्रववृतेयुद्धमद्भुतंचतयोरिव॥ सुमेरुस्तुलनांयातिगिरिणान्यतमेनकिम् ॥१५॥ तत्राभूत्कुंजरोदैत्योव्योमोत्तुंगःसुदारुणः ॥ यस्यलांगूलविक्षेपैःक्षोभितःक्षीरसागरः ॥ १६ ॥ रसेनप्लावयामासगिरीन्सर्वान्द्विजोत्तमाः ॥ प्रचंडशुंडादंडस्यभीताःप्रोच्चलितस्यच ॥ १७ ॥ पलायंतेग्रहाःसर्वेनक्षत्राणींदुभास्करौ ॥ विहायशैलगेहानिसिद्धानांमिथुनानिच ॥ १८ ॥ ननर्दगजराजोसौसहस्रघनगर्जितः ॥ तेन वृंदानिमेघानांभूमौपेतुर्नभस्थलात् ॥१९॥ तटत्कारयुतेनासावताडिशशिसंभृता ॥ खट्वांगे नप्रलंबेनसप्राणेनेवमूर्द्धनि ॥ २० ॥ चर्मणातच्चखट्वांगंबभारोपरिचोपरि ॥जहासतंमहादैत्यो जातंबलमितिब्रुवन्॥२१॥ततोऽस्त्रंकपर्दीशस्तंमुमोचरुषावशः॥आताम्रज्वलनज्वालाबभूवु र्गिरयस्तदा ॥२२॥ अस्त्रपातेनयादांसिसमुद्रेपाकमाययुः ॥ आमेघमंडलंधूमस्तदाभग्नाश्चता रकाः ॥ २३ ॥ लोचनानिमहेंद्रस्यवारिमुंचंतिहेद्विजाः ॥ विस्फुलिंगैर्दिशोदग्धास्तरवोभ स्मतांगताः ॥ २४ ॥ तदाकरांघ्रिसंघट्टाद्व्योमस्फुटितुमिच्छति ॥ धावंतितुरगाःस्वैरमर्धदं ताश्चदंतिनः ॥ २५ ॥ अभूवन्रथसज्जानिलोहशेषाणितत्क्षणात् ॥ तत्यजुर्लोहसन्नाहान्दा



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हकर्मकरान्भृशम् ॥ २६ ॥ वीराःपदातयोवाहाःसादिनोवाहकाअपि ॥ अहोशस्त्राणितप्ता
निकरतोमुमुचूरणे ॥ २७ ॥ प्लुष्टमुष्टिमतोयुद्धेप्रज्वलन्मुक्तमूर्द्धजाः ॥ चलंतिचामरायत्रसुच्छ
त्राणिध्वजांचलाः ॥ २८ ॥ तत्रकज्जलतामापुरस्त्रज्वालावलीवृताः ॥ कीलाचिटिपिटारा
वैःसर्वमापूरितंनभः ॥ २९ ॥ तटत्तटत्करास्फोटामल्लस्यांगेसमुद्गताः ॥ क्षणंव्याकुलितोदै
त्यस्तस्यास्त्रस्यप्रभावतः ॥३०॥ ततोसौधैर्यधीराशिर्मल्लनामामहासुरः ॥ अमुंचन्मौदिरंचा
स्त्रंततःश्यामलितंनभः ॥ ३१ ॥ अग्निरस्त्रस्यनिर्वातस्तेनधाराभिवर्षिणा ॥ बाष्पोष्मणापि
तत्सैन्यंव्यथामापद्द्विजोत्तमः ॥ ३२ ॥ लेगुःपयांसिधाराणांसंतप्ताःशैलसानवः ॥ दाहो
त्तीर्णतयामेरुर्वर्णोत्कर्षमुपागमत् ॥ ३३ ॥ सिंसिंकारकराण्यत्रशस्त्राणिसकलंदधुः ॥ पानीय
स्यपदंसद्यःसेनयोरुभयोरपि ॥ ३४ ॥ लंबमानैस्तदामेघैर्व्योमनीलांजनप्रभम् ॥ रराजकाल
खेलस्यश्रीभाजनमिवापरम् ॥ ३५ ॥ वर्षोपलैरतिस्थूलैःपतद्भिर्व्योममंडलात् ॥ शिरांसि
स्फोटिवीराणांदानवानांसमंततः ॥ ३६ ॥ करकाघातदूनास्तेपश्चाद्धर्धरगर्जनैः ॥ तुरंगा
पूर्वचरणैर्दुद्रुवुर्व्योम्निसांबुनि॥३७॥वर्षादृषद्भिर्निहताःसशीर्षत्राणमूर्धसु॥पदातयोरणव्यग्राः



पलायंतेपराङ्मुखाः ॥३८॥ धारासारसमूहैश्चव्याप्तःस्वर्गश्चभूतलम् ॥ प्रलयार्णवमालेनचचा
लसलिलंक्षणात्॥ ३९ ॥ शंभोर्गणानांवाद्यंतिदंततूर्याणिसर्वशः ॥ वारुणास्त्रजलौघेनपीडिता
नांद्विजोत्तमाः ॥४०॥ तरंतितुरगावारिस्फुरन्नासापुटद्वयाः ॥ खेलंतिकरिणःशुंडादंडतांडव
डंबराः ॥ ४१ ॥ निमज्जयंतिभारेणलोहनेमिरथांगकाः ॥ तत्रास्त्रसलिलांभोधौवाजिनः
प्लवतोरथाः ॥ ४२ ॥ इतिसैन्यंजलेमग्नंदृष्ट्वासौमणिखंडनः ॥ जलंनिवारयामासमारुतास्त्रेण
सत्वरम् ॥ ४३ ॥ शोणितंजलविस्तारिनभोगंजलधिस्थितम् ॥ दिगंतंतुलवन्नीतंदैत्यसैन्यंत
थालघु ॥४४॥ मुमोचाथमहादैत्यः पन्नगास्त्रंसुदारुणम् ॥ तेनास्त्रवायुर्गिलितःसेनादृष्टाचशां
भवी।४५।गरुडास्त्रंततःशंभुर्मुमुचेतेनपन्नगाः॥सैन्यंमल्लासुरस्यापिययौभीत्यारसातलम्।४६।
शंभुःपाशुपतास्त्रेणमंत्रितेनजघानतम् ॥ त्रिशूलेनसुतीक्ष्णेनदैत्यंमल्लंरणांगणे॥४७॥निवार्यमा
णंतच्छूलंगदयामुद्गरेणच ॥ शरैर्मुसलघातैश्चशक्त्याचब्रह्मदत्तया॥४८॥चक्रेणपरशुनाकुंतैःक
रवालेनकुंतलैः॥ पपातत्तदिमल्लस्यवृक्षेपविरिवाद्भुतम्॥४९॥ततोहाहाकृतंदैत्यैःक्षणादपिपला
यितम् ॥ रणेमल्लोभ्रमच्चक्षुःपपातवसुधातले॥५०॥ युद्ध्यसेरेमयासार्द्धंप्रहसन्नितितंहरः ॥ चर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णंमूर्धनिरुषाददौमल्लस्यसंगरे ॥५१॥ शंभोःपादाब्जसंस्पर्शात्तस्यशांताथदुर्मतिः ॥ निधाय मूर्ध्निचरणंबाष्पपूरितलोचनः ॥ ५२ ॥ सर्वांगजातपुलकःकंपीगद्गदकंठवान् ॥ नुनावशंभुंप रयाभक्त्यामल्लासुरस्तदा ॥ ५३ ॥ इतिश्रीब्रह्मांडपुराणेमल्लासुरमार्तंडभैरवयुद्धन्नामषोडशोऽ ध्यायः ॥ १६ ॥ सनत्कुमार उवाच ॥ जीवशेषोरणेदैत्यःपरेशकृपयावृतः ॥ स्तोत्रंचकारमल्ला रेःशृणुध्वंतद्द्विजोत्तमाः ॥ १ ॥ मल्लासुर उवाच ॥ पपोहंपापकर्माहंपापात्मापापसंभवः ॥ म मंदुर्मतिपंकाब्धौमांसमुद्धरशंकर ॥ २ ॥ जीवाःस्वतंत्राःकर्तृत्वेनैवशंभोभवंत्यपि ॥ त्वंसूत्रधारः सर्वेषांकर्मणीशशुभाशुभे ॥ ३ ॥ त्वंसृष्टिकर्ताजगतांत्वयासर्वमिदंततम् ॥ तस्माद्दैत्याविभि न्नाःकिंत्वंजानासिपरेशतत् ॥ ४ ॥ बुद्धिरूपस्त्वमेवेशयथानुदसिलीलया ॥ तथाचराचरंका र्येजगदेतत्प्रवर्तते॥५॥योदेवःसर्वभूतेषुबुद्धिरूपेणवर्तते॥नमस्तस्मैनमस्तस्मैनमस्तस्मैनमोन मः॥६॥योदेवःसर्वभूतेषुमोहरूपेणवर्तते॥नमस्तस्मै०॥७॥योदेवःसर्वभूतेषुशमरूपेणवर्तते ॥ नमस्तस्मै० ॥ ८ ॥ योदेवःसर्वभूतेषुकामरूपेणवर्तते ॥ नमस्तस्मै० ॥ ९ ॥ योदेवःसर्वभूतेषु भ्रमरूपेणवर्तते ॥ नमस्तस्मै० ॥ १० ॥ योदेवःसर्वभूतेषुधर्मरूपेणवर्तते ॥ नमस्त० ॥११॥



योदेवः सर्वभूतेषुहर्षरूपेणवर्तते॥नमस्त०॥१२॥योदेवःसर्वभूतेषुक्रोधरूपेणवर्तते॥ नमस्त० ॥१३॥ योदेवःसर्वभूतेषुमदरूपेणवर्तते ॥ नमस्त० ॥ १४ ॥ योदेवःसर्वभूतेषुदंभरूपेणवर्त ते ॥ नमस्त० ॥१५॥ योदेवःसर्वभूतेषुअहंरूपेणवर्तते ॥ नमस्त० ॥ १६ ॥ योदेवःसर्वभूतेषु आत्मरूपेणवर्तते ॥ नमस्त० ॥ १७ ॥ योदेवःसर्वभूतेषुवीररूपेणवर्तते ॥ नमस्त० ॥१८॥ योदेवःसर्वभूतेषुक्रियारूपेणवर्तते ॥ नमस्त० ॥१९॥ योदेवःसर्वभूतेषुशक्तिरूपेणवर्तते ॥ न मस्त० ॥२०॥ योदेवःसर्वभूतेषुशौर्यरूपेणवर्तते ॥ नमस्त० ॥२१॥ योदेवःसर्वभूतेषुमृत्यु रूपेणवर्तते ॥ नम० ॥२२॥ योदेवःसर्वभूतेषुज्ञानरूपेणवर्तते ॥ नमस्त० ॥२३॥ योदेवःस र्वभूतेषुलोभरूपेणवर्तते ॥ नमस्त० ॥२४॥ योदेवःसर्वभूतेषुविद्यारूपेणवर्तते ॥ नम०॥२५॥ योदेवःसर्वभूतेषुक्षुधारूपेणवर्तते ॥ नम० ॥२६॥ योदेवःसर्वभूतेषुनिद्रारूपेणवर्तते ॥ नम स्त० ॥ २७ ॥ योदेवःसर्वभूतेषुभक्तिरूपेणवर्तते ॥ नमस्त० ॥२८॥ नमःकारुण्यरूपायनमः संहारहेतवे ॥ नमःप्रपंचविदुषेप्रपंचरहितायते ॥ २९ ॥ नमस्तेविष्णुरूपायशिवरूपायतेन मः ॥ नमःपरमहंसायनमश्चिन्मात्ररूपिणे ॥३०॥ नमःसूक्ष्मायभव्यायस्थूलरूपायतेनमः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नमस्त्रैलोक्यनाथायभैरवायनमोनमः ॥ ३१ ॥ भक्तवात्सल्यरूपायनमस्त्रिपुरभेदिने ॥ स्तो
त्रेणमल्लदैत्यस्यपरितुष्टः सदाशिवः॥३२॥प्रत्युवाचरणेदेवोवृणीष्वेतिवरंपरम् ॥ मल्लासुर उवा
च ॥ देवेंद्रोदासतांनीतःप्रतापेनमहीयसा ॥ ३३ ॥ निर्विशंकंसुखंभुक्तमप्राप्यंत्रिदशैरपि ॥
परलोकस्यकाचिंतात्वयिदृष्टेपरावरे ॥ ३४ ॥ कीर्तिर्लोकेरणेमृत्युर्भवतोजगतःपते ॥ प्रार्थ
नीयंकिमस्त्यन्यत्तथापिप्रार्थयेशिव ॥३५॥ ममाभिधानपूर्वंतेनामभूयात्सुरेश्वर ॥ शिरःप्रे
तंचपादाधःस्थातुतेममसर्वदा ॥३६॥ छेदपातादिभक्तायेभवंतंपर्युपासते ॥ तेषांशीघ्रतरंवां
छांयदितुष्टोसिपूरय ॥३७॥ यन्मयाभवतःस्तोत्रंकृतंप्राणप्रयाणके ॥ प्रत्यहंतस्यपाठेननृणां
सिद्धिप्रदोभव ॥३८॥ नरोगोनचदारिद्र्यंनलोभोनाशुभामतिः ॥ नासौख्यंनचमात्सर्यंतेषांभ
वतुसर्वदा ॥३९॥ सरस्वतीरसमयीवक्त्रेलक्ष्मीर्गृहेषुच ॥ भक्त्युद्रेकेणदेवेशत्वांजनाःपर्युपास
ते ॥४०॥ तेषांत्वंसुलभःस्वामीप्रसन्नःस्यात्सदाशिवः ॥ श्रीमार्तंडभैरव उवाच ॥ तुष्टोहंतव
युद्धेनभक्त्याचपरिपूर्णया ॥ त्वयायत्प्रार्थितंमल्लतदस्तुममशासनात् ॥४१॥ सनत्कुमार उवा
च ॥ मल्लेचविलयंप्राप्तेयुद्धायाजग्मुरुद्धताः ॥ मल्लस्यपुत्राःपंचैवकुंभःशूलधरस्तदा॥४२॥दे



वगंधर्वनामासौतथालोहार्गलाभिधः ॥ महाबाहुरितिख्याताभक्तजाइत्युपेक्षिताः ॥ ४३ ॥
तथापिप्रोच्छलद्दर्पांस्ताञ्छशापसदाशिवः ॥ यूयमेवंविधामूर्खाःशैलतांव्रजताशुच॥४४॥इ
तिश्रीब्रह्मांडपुराणे०मल्लासुरकृतासदाशिवस्तुतिर्नामसप्तदशोऽध्यायः ॥ १७ ॥ सनत्कुमार
उवाच॥अथसप्तसमाहूयपुत्राधर्मस्यतान्मुनीन् ॥ सन्मानपूर्वमानंदंबभाषेचंद्रशेखरः॥१॥नि
हतोसौमहादैत्यःशत्रुर्मदबलोत्कटः ॥ लीलयानिजयेदानींसेवध्वंसुखमीप्सितम् ॥२॥महाप्र
सादइत्युक्त्वाप्रणिपत्यमहेश्वरम् ॥ शिवंविज्ञापयामासुर्भवितव्यंस्वयंभुवः ॥३॥ देवेनश्रीमता
चात्ररक्षार्थन्नःकृपाकृता ॥ कलिकालकृतैर्दोषैःपीडितानांसुखायच ॥ ४ ॥ तथास्त्विति
प्रतिज्ञायनिजशक्त्यायुतःशिवः ॥ लिंगद्वयमभूत्तत्रचंचत्कल्पतरोरधः ॥५॥ मार्गशीर्षामलेप
क्षेषष्ठ्यांवारेंशुमालिनः॥शततारागतेचन्द्रेलिंगंस्याद्दृष्टिगोचरम् ॥६॥आगताःसुदिनेतस्मिन्
यात्रार्थंत्रिदशात्सुराः ॥ सकलत्राःसपुत्राश्चमुनयःसकुटुंबकाः ॥७॥ नागांगनायुताः सर्पाः
सिद्धाःस्वतरुणीयुताः ॥ गंधर्वाःकिन्नरायक्षाःस्वर्वेश्यामेनकादयः ॥ ८ ॥ तत्रप्रेमपुरंजातंरा
जधानीमणिद्विषः ॥ सर्वासांवर्णजातीनांध्यानगम्यासुरैःकृता ॥ ९ ॥ मूर्तिर्महीमयीशंभोर्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

थामार्तंडभैरवी ॥ अश्वेनसादिनापार्श्ववर्तिनामणिनायुता॥१०॥मःशंभुरश्चविष्णुश्चताविला
यांयदास्थितौ ॥ तदामेलापदंजातंतामारातीतिविग्रहात् ॥ ११ ॥ मैलारइतिमल्लारेर्नामधे
यमभूत्तदा ॥ सावर्ण्यरलयोःप्रोक्तंमैरालइतितेनवा ॥१२॥ तस्मैमैरालदेवायनमइत्यवदन्सु
राः ॥ अभ्यर्च्यपार्थिवंदेवंपुष्पैर्नंदनसंभवैः ॥ १३ ॥ धूपैर्दीपैश्चतांबूलैःपशुभिःपात्रपूरणैः ॥
लेह्यचोष्योपहारैश्चगीतैर्नृत्यैर्मनोहरैः ॥१४॥ भक्ष्यैःखाद्यैर्दर्पणस्यदर्शनैश्चामरैरपि ॥ चंद्रक
स्तूरिकालेपैर्हरिद्राचूर्णचंदनैः ॥ १५॥ सिंदूरपूरैःपाच्याचकृष्णशीरैःसुतंडुलैः ॥ मयूरचामर
व्रातैस्तरुणीनांमहोत्सवैः ॥ १६ ॥ संतोष्यतुष्टुवुर्देवामल्लारिंमुनयोपिच ॥ देवा ऊचुः ॥
जयदेवजगन्नाथजयखंडेंदुशेखर ॥ जयगंगाजटाजूटजयविश्वैकपालक॥१७॥जयमल्लमहादै
त्यसैन्यदेहविमर्दन ॥ जयलोलमहाखड्गजयपात्रोल्लसत्कर ॥ १८ ॥ जयश्रीह्यालसाकांतत्रि
शूलधरमल्लहन् ॥ जयप्रतापविस्तारिञ्जयत्वंमणिसूदन ॥१९॥ जयप्रेतासनाधीशजयमार्तंडभै
रव ॥ जयत्रिपुरविच्छेदजयमल्लासुरांतक ॥२०॥ नमःसंगरवीरायनमोरुद्रायशूलिने ॥ अंध
कध्वंसिनेतुभ्यंनमोवागीश्वरायते ॥२१॥ निहंत्रेमल्लदैत्यस्यभर्त्रेविश्वस्यतेनमः ॥ सुरार्चितां

घ्रयेनित्यंनमःकंदर्पमर्दिने ॥ २२ ॥ नमोमल्लारिदेवायमैरालायनमोनमः ॥ कलिदोष
विनाशायनमोभक्तप्रियायच ॥२३॥ नमःकारुण्यपूर्णायनमःसंहारकेलये ॥ नमःकनकगौरा
यनमश्चांपेयरोचिषे ॥२४॥ मृन्मयोपिचमल्लारेश्चेतनात्माभवत्तदा ॥ उवाचसमुनीन्देवान्वृणु
ध्वमितिसत्वरम् ॥ २५ ॥ देवा ऊचुः ॥ देवेनश्रीमतासर्वंकृतंविश्वस्ययद्धितम् ॥ उत्तीर्णोवसु
धाभारोमल्लदैत्यचमूकृतः ॥२६॥ तथापिदेवकर्तव्यंयेषांचेतसिवर्तसे ॥ गेहेषुतेषामतुलाकम
लात्यागभोगदा ॥२७॥ बहवःपशवःपुत्रास्तुरंगाःसुखमीप्सितम् ॥ राज्ञांनिष्कंटकंराज्यंवा
जिकुंजरसंकुलम् ॥ २८ ॥ कोशदेशपरीवारललनारत्नसुंदरम् ॥ सौभाग्यंयोषितांभूरिसौ
ख्यंपुत्राःशतायुषः ॥२९॥ नित्यंभूपालमान्यत्वंसर्वदाविजयोरणे ॥ विवादेवादिनांतेषांविप
रीतार्थवादिनाम् ॥३०॥ ब्रह्मांडखंडविस्तारियशोभूयात्समुज्ज्वलम् ॥ अंतेमोक्षपदंदेहिपा
हिनोमल्लमर्दन॥३१॥शतानिसप्तश्लोकानांमाहात्म्यंतवशंकर॥ नित्यंपठंतिमल्लारेतेषांत्वंवरदो
भव॥३२॥ लिखितंपुस्तकंचैतत्पूजयंतिनिरंतरम्॥सुखंधान्यंधनंस्वर्गंयशोभाग्यंजयोदयः ॥
॥३३॥तेषांभवंतुमल्लारेपुत्राविद्याविशारदाः॥अरयःसंक्षयंयांतुगृहंनन्दतुसर्वदा।३४।ग्रहभूत



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पिशाचाद्याडाकिन्योयक्षराक्षसाः ॥ तत्रबाधानकुर्वंतुसर्पाद्याःक्रूरजातयः ॥ ३५ ॥ स्थावरं जंगमंचापिकृत्रिमंचापियद्विषम् ॥ मंत्रयंत्राभिचाराद्यास्तत्रकुंठीभवंत्विति ॥ ३६ ॥ श्रीमन्म ल्लारिरुवाच ॥ इदानींप्रार्थितंदेवायुष्माभिर्मुनिभिश्चयत् ॥ सर्वमस्तुमनुष्याणांसर्वदामदनुग्र हात् ॥ ३७ ॥ ॥ इतिश्रीब्रह्मांडपुराणेसुरर्षिवरप्रदानंनामाष्टादशोऽध्यायः ॥ १८ ॥ ऋ षय ऊचुः ॥ कलिकालमलध्वंसिमल्लारेश्चरितंश्रुतम् ॥ ब्रह्मनंदनतेवाक्यात्तेनाभून्नःकृतार्थता ॥ १ ॥ लब्धानिमंत्रवीर्याणिदारिद्रेणपलायितम् ॥ फलिष्यंतितपांसीहत्वत्प्रसादान्महामुने ॥ २ ॥ इदानींश्रोतुमिच्छामोमल्लनाथप्रभावतः ॥ मुनेप्रेमपुरस्थानितीर्थानित्वन्मुखांबुजात् ॥ ३ ॥ सनत्कुमार उवाच ॥ श्रृणुध्वंब्राह्मणायूयमस्मिन्प्रेमपुरोत्तमे ॥ सार्धंकोटित्रयंपुण्यंती र्थानांवर्ततेऽधुना ॥ ४ ॥ तेषांप्रशंसाकथनेनविभुःपद्मसंभवः ॥ नषण्मुखोनशेषोपिशोच्यःको हंतथापिच ॥ ५ ॥ मुखानांतत्रकेषाचित्कथयामिस्वभावतः ॥ श्रृणुध्वंब्राह्मणानृणांसर्वसिद्धि प्रदायकम् ॥ ६ ॥ देवस्यचोत्तरेभागेशक्तिकुंडंतुतिष्ठति ॥ तत्रचांपेयषष्ठ्यांवाभानुवारेणवै धृतौ ॥ ७ ॥ व्यतीपातेचसंक्रांतौनवम्यामाश्विनस्यच ॥ चैत्रेचैवतथाषष्ठ्यांकार्तिक्यांकृत्ति



कासुच ॥८॥ अथवाजन्मनक्षत्रेस्नानंकृत्वाचमौनवान् ॥ मूलीभूतःस्थितःपूर्वविष्णुर्दैत्यंसमा गतः ॥ ९ ॥ मूलदेवइतिप्रोक्तःसुरैःसंपूजितःस्वयम् ॥ संपूज्यघृतमारींचदेवींसिद्धिप्रदायि नीम् ॥ १० ॥ यस्तुपश्यतिदेवेशंमल्लारिंपूजयत्यपि ॥ सप्तजन्मकृतंपापंदर्शनात्तस्यनश्यति ॥ ११ ॥ ब्रह्मघ्नोवासुरापोवास्वर्णहृद्वृषलीपतिः ॥ कृतघ्नःसुरभिघ्नश्चतथाविश्वासघातकः ॥ १२ ॥ अगम्यागमनीयश्चपूजनाच्छुद्धिमाप्नुयात् ॥ लभंतेशाश्वतींलक्ष्मींराज्यवश्यंमहद्यशः ॥ १३ ॥ कैलासशिखरेवासःप्रज्वलंद्रत्नमंडपे ॥ भोगान्भुनक्तिविविधान्यावच्चंद्रार्कतारकाः ॥१४॥ देवादाग्नेयदिग्भागेगयातीर्थंसुदुर्लभम् ॥ पदंतत्रास्तिमल्लारेःश्रृणुध्वंतद्द्विजोत्तमाः ॥१५॥ तत्रस्नात्वातिलैर्युक्तंकुशदर्भैश्चसंयुतम् ॥ पिंडंददातियस्तत्रपदेगोत्रंसमुच्चरन् ॥१६॥ पितृणामक्षयातृप्तिर्जायतेतस्यहेद्विजाः ॥ तत्राख्यानंपुरावृत्तंश्रृणुध्वंमेघवाहने ॥ १७ ॥ कल्पेपुराधनोत्साहेनगरेभून्महाधनी ॥ वणिक्चंद्राननस्तस्यपुत्रोभूत्कूटदुर्मतिः ॥१८॥ तेन कूटतुलांकृत्वावंचिताःक्रयविक्रये ॥ जनास्तेनैवपापेनवायसोभूद्विहंगमः ॥ १९ ॥ विचर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्स्वेच्छयाखेसौयावनालार्द्धकंदधन् ॥ प्रयातितस्यगलितंतच्चंचुपुटतःपदे ॥२०॥ तेनतस्या
भवत्तृप्तिःपितॄणांतोषकारिणी ॥ विमुक्तस्तेनदेहेनययौस्वर्गंसनातनम् ॥ २१ ॥ देवादुत्तरदि
ग्भागेतीर्थंकपिलसंज्ञितम् ॥ तस्मिन्कपिलषष्ठ्यांयःस्नात्वामल्लारिभैरवम् ॥२२॥ पूजयेदुत्तमैः
पुष्पैःपाच्ययादूर्वयापिवा ॥ सयातिचर्मदेहेनस्वर्गंभोगप्रदंशिवम् ॥ २३ ॥ विनाकपिलषष्ठीं
चयादृशेतादृशेदिने ॥ स्नानमात्रंविधायैवमल्लारिंपश्यतिक्षणात् ॥ २४ ॥ तस्यप्राक्तनपापा
निब्रह्महत्यासमानिच ॥ नश्यंतितत्क्षणादेवभोगान्भुंक्तेचशाश्वतान् ॥२५॥ ईशानकोणेमल्ला
रेर्गुप्तंमल्लेश्वराभिधम् ॥ तीर्थंवापीमयंक्रोशमात्रेतिष्ठतिपुण्यदम् ॥२६॥ तस्योदकस्यपानेनचू
लकार्द्धेनतत्क्षणात् ॥ सर्वपापैर्विनिर्मुक्तःपुमान्यातिपरांगतिम् ॥ २७ ॥ तत्रेतिहासमप्याद्यं
कथयामासपद्मभूः ॥ शृणुतब्राह्मणास्तंचविश्वविस्मयकारकम् ॥२८॥ ब्रह्मा उवाच ॥ पुरा
स्वारोचिषिमनौवर्तमानेप्रयागके ॥ क्षेत्रेक्षत्रीमहाबाहुर्दैवाद्दारिद्र्यपीडितः ॥ २९ ॥ चोरःस
जातोमार्गेषुजघानब्राह्मणान्दश ॥ वधूवराणिसप्तैवसप्तकन्याःसुलक्षणाः ॥ ३० ॥ अगण्यान्

वणिजाञ्छूद्रान्पथिकान्धनशंकया ॥ वसन्नरण्येकस्मिंश्चिदसौव्याघ्रेणभक्षितः ॥ ३१ ॥ य
मलोकगतस्तत्रभुक्त्वाथनिरयांस्ततः ॥ तस्यपापेनपितरःकुंभीपाकेनियोजिताः ॥ ३२ ॥
शेषकिल्बिषभोगायगर्दभोभूत्सपापवान् ॥ पत्तनेनगचूलाख्येसोमदत्तस्यमंदिरे ॥ ३३ ॥ या
त्राप्रसंगात्तेनासौभारवाट्सतुगर्दभः ॥ आनीतःसोमदत्तेनतदाप्रेमपुरंप्रति ॥ ३४ ॥ पीडितो
सौतृषातत्रबद्धकीलेनवर्तते ॥ तत्तीर्थजलशेषस्तुकुंभस्तेनावलेहितः ॥ ३५ ॥ तत्क्षणाद्गर्दभं
रूपंत्यक्त्वापंचत्वमागतः ॥ स्वर्गंगतोऽथबुभुजेशक्रसामीप्यमागतः ॥ ३६ ॥ स्रक्चंदनानि
दिव्यानिकामिन्योमेनकामुखाः ॥ नृत्यंतःपितरस्तस्यकैलासंसहसागताः ॥ ३७ ॥ सक्षत्री
सार्वभौमोभूत्सिंहविक्रमकेसरी ॥ पपालमेदिनींसर्वांसमुद्रवलयांकिताम् ॥ ३८ ॥ मल्लारेर्द
क्षिणेभागेतीर्थंपापविनाशनम् ॥ तत्रस्नात्वासमालिंग्याश्वत्थंभैरवरूपिणम् ॥३९॥ मल्लारिंच
ततःपश्येत्सर्वपापैःप्रमुच्यते ॥ यत्कृतंपूर्वजैःपुंभिर्महापापादिकंमहत् ॥ ४० ॥ यत्कृतंजन्म
नांलक्षैःस्वयमंहःसुदुस्तरम् ॥ तत्सर्वंविलयंयातितस्यतीर्थस्यसेवनात् ॥४१॥ तस्यकुंडस्यसा



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मीप्येनंदिकुंडंतुवर्तते॥तत्रस्नातस्ययत्पुण्यंशृणुध्वंतद्द्विजोत्तमाः।४२।गवांसुवर्णशृंगीणांलक्षं
ताम्रांशुकावृतम्॥ दोहकांस्यैरपियुतंतथारौप्यखुरान्वितम्॥ ४३॥ पयस्विनीनांसूर्येंद्वोर्ग्रहणे
मंत्रपूर्वकम्॥वेदविद्भ्यःप्रदानेनयत्फलंतद्भवेद्ध्रुवम्।४४।पुनर्मल्लारिदेवेशंयःपश्येत्परमेश्वरम्॥
तस्यपुण्यस्यमाहात्म्यंब्रह्माजानातिवानवा॥४५॥धन्वंतरशतादस्तिदेवादीशानकोणतः॥रुद्र
कुंडंमहातीर्थंयोगिनामपिदुर्लभम्॥४६॥ स्नानमात्रेणतत्रैवपुनर्जन्मनविद्यते॥ ज्ञानमुत्पद्यते
सद्यःस्वात्मनःपरिपूर्णता॥४७॥भोगेच्छुभिर्नतत्सेव्यंभवबंधविधूननम्॥श्रीगुरोःकरुणापांगै
र्यत्कृतंतद्भवेद्ध्रुवम्॥४८॥ पुरातनमितीहासंशृणुध्वंतंद्विजोत्तमाः॥इंद्रनीलपुरेतिष्ठञ्छंभुदत्तो
द्विजःपुरा॥ ४९॥ कर्मैकनिष्ठःसततंसदाचारप्रियःसदा॥ नसाध्वितिकृतंकर्ममन्यतेहृदि
सर्वदा॥ ५०॥ पुनःशंकाकुलंकर्मकरोत्येवसदादरात्॥ कृत्वाविरुद्धंमनुतेविषादंगाहतेपुनः
॥५१॥ इतिसंशयबुद्धेस्तुतस्याभूदायुषःक्षयः॥ततोसौर्धमसदनेपुण्यपापविचारणे॥ ५२॥
चित्रेणचित्रगुप्तेनकर्मतस्येतिनिश्चितम्॥ कृत्वायद्वैदिकंकर्मवृथागतामितिस्फुटम्॥ ५३॥



मेनेतेनास्ययत्पापंयेनस्यान्नरकेस्थितिः॥ सभुक्त्वानरकानुग्रान्कोटिजन्मशतानिच॥५४॥
अभूत्पक्षीसतत्तीर्थेपीत्वाचंच्वाजलंक्षणात्॥ विमुक्तःपक्षिदेहेनब्राह्मणोभूत्सबुद्धिमान्॥५५॥
उत्पन्नंसहजंज्ञानंयेनपश्यतिचिन्मयम्॥ विश्वंचराचरंस्वात्मरूपंजलतरंगवत्॥५६॥ अंबुधा
राभिधंतीर्थमुत्तरस्यांशिवालयात्॥ तत्रस्नात्वांबुपीत्वाचमल्लारिंयस्तुपश्यति॥ ५७॥
मुच्यतेप्राक्तनैःपापैःसयातित्रिदशालयम्॥ अत्रेतिहासमप्येकमवदन्नृषयः पुरा॥५८॥ आ
सीदवंत्यांकंदर्पोभूपतिःश्रीप्रतापवान्॥ तेनराज्यमदांधेनप्रलोभंप्रापिताःस्त्रियः॥ ५९॥
अन्येषांदूतिकायोगैर्वस्त्रालंकारभूषणैः॥अन्यैश्चविविधैर्भोगैःसुवर्णेनयदृच्छया॥६०॥ बभूव
गोचरोमृत्योःसराजाकालशासनात्॥ लिंगदेहस्ययोगेनदूतैर्नीतोयमालयम्॥ ६१॥ बहु
धातत्रनरकान्बुभुजेतीवदुःसहान्॥ चिरंततोभुक्तशेषपापभुक्त्यैभुवंययौ॥ ६२॥ विधात्रा-
भृंगरूपेणसंसारेविनियोजितः॥ कदाचिदंबुधारेस्मिन्सभृंगश्चाप्लुतःक्षणम्॥ ६३॥ स्थितः
कल्हारकेयस्मिन्नुनंतत्पूजनेनच॥ तद्गंधलुब्धोभ्रमरःसहतेनशिवंययौ॥६४॥ अपश्यंस्तत्रम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल्लारिंजहौभृंगःकलेवरम् ॥ पुनःकंदर्परूपोसौकंदर्पःक्षितिपालकः ॥ ६५ ॥ बुभुजेसकलांपृ-
थ्वींसाब्धिद्वीपांसपर्वताम् ॥ चंद्रांशुधवलांकीर्तिंलेभेधर्मरतःसदा ॥ ६६ ॥ इतिश्रीब्रह्मांड
पुराणेक्षेत्रखंडेश्रीमल्लारिमाहात्म्ये अष्टतीर्थवर्णनन्नामैकोनविंशोऽध्यायः॥१९॥ऋषिरुवाच॥
मुनीशश्रुतमस्माभिरष्टतीर्थफलंमहत् ॥ तथापि श्रोतुमिच्छामितीर्थान्यन्यानितेमुखात्॥१॥
सनत्कुमार उवाच ॥ श्रूयतामृषयस्तीर्थफलंप्रेमपुरःसरम् ॥ मुख्यानांषष्टिमतुलांतीर्थानांकथ
याम्यहम् ॥२॥ रामतीर्थेमहापुण्येस्नात्वापश्येन्मणिद्विषम्॥सप्तजन्मकृतंपापंतत्क्षणादेवनश्य
ति ॥३॥ स्नात्वामल्लेश्वरेतीर्थेमल्लारिंयस्तुपश्यति ॥ ब्रह्महत्यादिकंपापंतस्यनश्यतितत्क्षणात्
॥४॥ स्नात्वासूर्याभिधेतीर्थेमासमेकंसुधीर्नरः ॥ मल्लारेःप्रांगणेनक्तंदिवंसेवेतबुद्धिमान् ॥५॥
तस्याष्टादशकुष्ठानिनश्यंतिशिवतांव्रजेत् ॥ लभेतभोगानखिलान्यशोलक्ष्मींसुखायुषम् ॥६॥
क्षेत्रस्यपूर्वदिग्भागेशोणतीर्थमनुत्तमम् ॥ तत्रस्नात्वाशिवंनत्वामुच्यतेदैन्यपातकैः ॥७॥ वैतर
ण्यांतुयःस्नायात्सूर्येंद्वोर्ग्रहणेनरः ॥ मल्लारिंचततःपश्येद्विष्णुलोकंसगच्छति ॥८॥ परशुरामा



भिधंतीर्थंस्नानान्मुक्तिप्रदंनृणाम् ॥ शिवतीर्थेमहापुण्येस्नात्वापश्यतियःशिवम् ॥ ९ ॥ माक्षा-
र्थीलभतेमोक्षंभोगार्थीभोगमाप्नुयात् ॥ क्षेत्रस्यदक्षिणेभागेकोटितीर्थंमहाफलम् ॥ १० ॥ तत्र
स्नातस्यपापानांनाशमायांतिकोटयः ॥ तत्समीपेमहापुण्यमश्वतीर्थंसुदुर्लभम् ॥ ११ ॥ तत्र
स्नात्वाचदत्वाचस्वर्गंयांतिनराःस्वयम् ॥ तत्सन्निधौशक्तितीर्थंशक्तिलोकप्रदायकम् ॥ १२ ॥
स्नानमात्रेणलोकानांभुक्तिंमुक्तिंचयच्छति ॥ क्षेत्रस्यपूर्वदिग्भागेकुंडमौग्रंसुतीर्थकम् ॥ १३ ॥
तत्रस्नानेनदानेनदशयज्ञफलंलभेत् ॥ तीर्थंगणपतेस्तत्रस्नात्वायेलड्डुकान्बहून् ॥१४॥ सदक्षि
णान्ब्राह्मणेभ्यःप्रयच्छंतिगणाधिपम् ॥ अर्चयंतिनरास्तेषांविघ्नोदूरात्पलायते ॥ १५ ॥ भैरवे
णस्वहस्तेनमृगयायांहतःकिटिः ॥ कालभैरवकुंडाख्यंजातंभैरवशासनात् ॥ १६ ॥ प्रयागः
संगमौनद्योर्यत्रन्यग्रोधपादपः ॥ आस्तेमहान्माघमासेरवावर्धोदितेनरः ॥ १७ ॥ तस्योदक
स्पर्शमात्रान्मल्लारेःप्रियतांव्रजेत् ॥ स्नानेनलभतेमुक्तिंभोगान्मल्लारिशासनात् ॥ १८ ॥
यःस्नायान्मासमेकंतुप्रयागफलमश्नुते ॥ सर्वतीर्थेषुयःस्नायात्सवतीर्थेफलंचसः ॥ १९॥ तीर्थ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेकादशाख्यंहितत्रैकादशवासरम्॥स्नात्वामल्लद्विषंपश्येद्रुद्रलोकेसपूज्यते॥२०॥ मल्लस्यवरुणं
चास्त्रंयत्रशांतंमहीतले॥तत्राभूद्वारुणंतीर्थंस्नानान्मुक्तिप्रदंनृणाम् ॥२१॥ यत्रप्रक्षालितौपादौ
पार्वत्यालीलयानिजौ ॥ तत्राभूत्पार्वतीतीर्थंभैरवेणाभिवंदितम् ॥ २२ ॥ यत्रोदबिंदुसंसि
क्ताकोपाङ्गामहींगता ॥ बभंडभैरवेणासौपार्वत्याचसदाशिवः ॥ २३ ॥ पार्वतीगंगयोरैक्यं
गंगाह्वालसिकाभिधम् ॥ निर्ममेसूंढरंरूपंप्रीत्यांगेस्वेदधारयत् ॥ २४ ॥ शक्तित्वेनजगत्पूज्यं
सुरासुरनमस्कृतम् ॥ तत्तीर्थस्नानमात्रेणसर्वान्भोगाल्लँभेत्पुमान् ॥ २५ ॥ अंतेगुरुमुखाज्ज्ञा
नंसच्चिदानंदविग्रहम् ॥ श्रुत्वावतारंमल्लारेर्नागैःप्रेमपुरंप्रति ॥ २६ ॥ भोगावतीप्रेषितात्रस्ना
नाद्यज्ञफलप्रदा ॥ अगस्त्योगौतमश्चात्रिःपुलस्त्योभृगुरंगिराः ॥ २७ ॥ भारद्वाजोवसिष्ठश्च
कश्यपःशौनकस्तथा ॥ जमदग्निर्भार्गुरिश्चच्यवनश्चसनातनाः ॥ २८ ॥ अंबरीषःसुराचार्यः
कहोलश्चपराशरः ॥ मतंगःपौंड्रकश्चैवकौशिकःकण्वसंज्ञकः ॥ २९ ॥ वत्सोवैश्वानरोबोधि
र्मांडव्यःकौंडनाभिधः ॥ व्यासःसांख्यायनःकुत्सोगालवः सौभरिर्यथा ॥ ३० ॥ वात्स्याय



नश्चशांडिल्योमांडूकायनइत्यपि ॥ वाल्मीकश्चैवजाबालिरेभिर्यत्रकृतंतपः ॥३१॥ तत्तत्तीर्थं
तदाख्येयंनृणांमुक्तिप्रदंशिवम् ॥ मल्लारेराज्ञयास्नानमात्रात्प्रेमपुरस्थितम् ॥३२॥ ऋषिनामा
नितीर्थानिपंचत्रिंशद्द्विजोत्तमाः ॥ अग्निकुंडाभिधंतीर्थंस्नानमात्रेणयन्नृणाम् ॥ ३३ ॥ दहत्य
श्रीपदंशीघ्रंमहंतामेनसांचयम् ॥ यमतीर्थेतुयःस्नायात्सयमंनैवपश्यति ॥ ३४ ॥ अवगाहे
नकंदर्पतीर्थस्यसुभगोभवेत् ॥ स्नायाद्योब्रह्मणस्तीर्थेब्रह्मलोकमवाप्नुयात् ॥ ३५ ॥ स्नात्वाह
रिहरेतीर्थेहरीशप्रियतांव्रजेत् ॥ कुबेरतीर्थेयःस्नायात्सधनीभवतिध्रुवम् ॥ ३६ ॥ स्नानेनवायु
तीर्थस्यबलवाञ्जायतेनरः ॥ देवेंद्रतीर्थेयःस्नायाद्देवेंद्रोजायतेनरः ॥ ३७ ॥ महिमाषष्टितीर्था
नांब्रह्मणाःसमुदीरितः ॥ सुलभःसर्वलोकानांभुक्तिमुक्तिफलप्रदः ॥ ३८ ॥ इतिश्रीब्रह्मां
डपुराणेक्षेत्रखंडेश्रीमल्लारिमाहात्म्येषष्टितीर्थवर्णनंनामविंशतितमोऽध्यायः ॥२०॥ ॥
ऋषय ऊचुः॥ ब्रह्मपुत्रत्वयाख्यातंतीर्थानांवर्णनंशुभम् ॥ तेनतृप्तावयंनूनंत्वत्प्रसादान्महामुने॥
॥१॥ कलौसिद्धिप्रदंनृणांमल्लारेःपूजनात्फलम् ॥ इच्छामःसर्वथाश्रोतुंयद्गुह्यंभुवनत्रये ॥२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सनत्कुमार उवाच ॥ कथयामिसमासेनरहस्यंपारमेश्वरम्॥पूजनस्यफलंविप्राःश्रवणात्सर्वका
मदम् ॥ ३ ॥ येकुर्वंतिसदाभक्तिंमल्लारेस्तेजनाःप्रियाः ॥ मल्लारिणाशिवेनोक्ताभक्तिरष्टवि
धायथा ॥४॥ श्रीमल्लारिरुवाच ॥ भक्तिःप्रीतिःकथाकांक्षाममध्यानंतथाजपः ॥ पूजानुमो
दनंस्तोत्रमावेशेनोपजीवनम् ॥ ५ ॥ भक्तिरष्टविधाचैषायस्यांम्लेंछोपिवर्तते ॥ सविप्रेंद्रोमु
निःश्रीमान्सयतिःसचपंडितः ॥ ६ ॥ समुक्तःसर्वपापेभ्योशिवलोकेमहीयते ॥ ग्रहभूतपिशा
चोग्राडाकिन्यःपूतनादयः ॥ ७ ॥ चोराःसर्पागजाव्याघ्रानपीडांतस्यकुर्वते ॥ राजानोमित्र
तांयांतिवादिनोमूकतामपि ॥ ८ ॥ आपदःशत्रवोरोगाश्चेटकोपविषाणिच ॥ अभिचाराःकु
यंत्राणिनस्पृशंतिचतंनरम् ॥ ९ ॥ नमेप्रियश्चतुर्वेदीविप्रोविद्याविशारदः ॥ याज्ञिकःश्रोत्रि
योवान्योऽवतारस्यास्यपूजकः ॥१०॥ प्रियोमेसर्वदायस्तुमद्भक्तःश्वपचोपिवा ॥ तस्मैदेयंत
तोग्राह्यंसचपूज्योयथाह्यहम् ॥११॥ योमांसर्वगतंपश्येत्सर्वंचमयिसंस्थितम् ॥ तस्याहंनित्य
मात्मस्थस्तरंगैःसलिलंयथा ॥ १२ ॥ इतिभक्तिःसमासेनकथितामुनिसत्तमाः ॥ इदानींस
विशेषेयंभक्तिःसम्यक्निगद्यते॥१३॥ आचार्यंचसमभ्यर्च्यसर्वस्वेनस्वशक्तितः ॥ सुवर्णवस्त्र



भूषाद्यैःपरितोषंपरंनयेत् ॥१४॥ लब्ध्वातस्यमुखांभोजान्मल्लारेर्मंत्रमुत्तमम् ॥ न्यासपूजावि
धिंसर्वंध्यानंमानसपूजनम् ॥ १५ ॥ योजपेत्तंमनुंधीमान्ध्यानपूर्वंसुभक्तितः ॥ लभतेतत्फलं
भक्तेःसदाचारःशुचिर्नरः ॥ १६ ॥ शुचौपूजागृहेरम्येधौतेवागोमयांकिते ॥ धौतांशुक
वितानेथपुष्पमालोपशोभिते ॥ १७ ॥ स्वर्णस्यरंजितामूर्तिरुत्तमाकामदानृणाम् ॥ तद
भावेतुरौप्यस्यताम्रस्यैवापिदारुजा ॥ १८ ॥ शिलापृथ्वीमयीवापिप्रतिष्ठाविधिपूर्वकम् ॥
त्रिशूलंडमरुंखड्गंपानपात्रधरांशुभाम् ॥ १९ ॥ युक्तांचगंगाह्यालस्यासर्वालंकारशोभिताम् ॥
वस्त्राद्यलंकृतांतांचमनसावापिचिंतिताम् ॥२०॥ माहात्म्यपुस्तकंचैतदथवास्थापयेत्सुधीः ॥
सौवर्णेराजतेपीठेताम्रजेदारुजेऽथवा ॥ २१ ॥ सुवस्त्रांतरितेतस्मिन्संस्थाप्यार्घ्यंपुरस्ततः ॥
कर्पूरचंदनाद्यैस्तदापूर्यमनुपूर्वकम् ॥२२॥ तदंबुबिंदुसंसर्गिकुसुमाद्यैःसमर्चयेत् ॥ मल्लारिंभा
वसंयुक्तःशृणुध्वंतत्फलंद्विजाः ॥ २३ ॥ पार्यातकस्यकुसुमैर्मल्लारिंपूजयेत्तुयः ॥ सया
तींद्रपदंशक्रोब्रह्मत्वमधियच्छति ॥ २४ ॥ अर्चयेदंबुजैःशुभ्रैर्नीलरक्तैर्मणिद्विषम् ॥ कल्प

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लक्षंवसेत्स्वर्गसशक्रसमतांगतः ॥ २५ ॥ शंखवर्णाशोणवर्णास्वर्णवर्णाचमालती ॥ अर्चयेत्कु
सुमैस्तस्यामल्लारिंदेवभूपतिम् ॥२६॥ आब्रह्मकल्पंलभतेस्वस्थितिंशिवसन्निधौ ॥ इहलोके
शुभान्कामान्कमलालंकृतोनरः ॥ २७ ॥ कृष्णरक्तैःसितैःपीतैःशतपत्रैर्यजेच्छिवम् ॥ पार्या
तकसमंतस्यफलंपूर्णमनोरथम् ॥ २८ ॥ हेम्नःपुष्पाणियःकृत्वाकलधौतस्यवापुनः ॥ मैराल
मर्चयेद्देवंपार्यातकफलंलभेत् ॥ २९ ॥ चांपेयैर्बकुलैःकुंदैःपुन्नागैःसुरपर्णजैः ॥ पाटलैर्मल्लिका
जातैःकिंशुकैर्नागकेसरैः ॥ ३० ॥ मल्लारिमर्चयेद्यस्तुरुद्रलोकेमहीयते ॥ अवाप्यभोगानखि
लान्कीर्तिदिग्वलयांकिताम् ॥ ३१ ॥ कदंबैःक्षेत्रकौसुंभैरेलैरेवातिकाभवैः ॥ मल्लारिंभावये
त्पुष्पैःशिवभृत्यःप्रियोभवेत् ॥ ३२ ॥ चारुवर्णैःकर्णिकारैरशोकतरुसंभवैः ॥ कांचनारस्यकु
सुमैःकरवीरैःसितासितैः ॥ ३३ ॥ मल्लद्विषंपूजयेद्यःकलिदोषैर्नबाध्यते ॥ प्राप्नोतिविविधान्
भोगान्रुद्रलोकेमहीयते ॥ ३४ ॥ अर्कमंदारकनकसिंधुवारसमुद्भवैः ॥ जपाबंधूकसिंदूरकर्णि
कागिरिमल्लकैः ॥ ३५ ॥ पुष्पैःसंपूजयेद्देवंसयातिपरमांगतिम् ॥ लक्षमेकंतुशरदांवसेद्रुद्रस्य



सन्निधौ ॥ ३६ ॥ रुद्राह्वयसमाहूतैरागस्त्यैश्चुतवृक्षजैः ॥ अर्चयेत्पार्वतीशंयःशतपत्रफलंल
भेत् ॥३७॥ पाच्यासमर्चयेच्छंभुंकृष्णोशीरेणवापुनः ॥ मल्लारेःप्रेमपात्रत्वंमांगल्यंसव्रजेद्धनी
॥ ३८ ॥ नागवल्लीदलैःशुभ्रैःकृष्णैर्वापूजयेद्विभुम् ॥ सयातिनागलोकस्यसाम्यंमल्लारिशास
नात् ॥ ३९ ॥ सुकोमलश्चचूताग्रैर्जंब्वग्रैर्नीललोहितैः ॥ येपूजयंतिमल्लारिंसर्वलोकेप्रपूजिताः
॥ ४० ॥ सुरूपाःसुभगाधन्यास्तेभवंतिशतायुषः ॥ मंजुलावाग्विलासेनस्वात्मज्ञानैकतत्प
राः ॥ ४१ ॥ बिल्वपत्रैश्चराजानोभूमौतेस्वर्गसन्निभाः ॥ गंगापत्रीद्रोणपुष्पीसुरपर्णीमरुद्ध
कैः ॥ ४२ ॥ बर्बरीतुलसीभिश्चपूजितोमल्लसूदनः ॥ यैस्तेवसंतिकैलासेकल्पकोटिशतानिच
॥ ४३ ॥ दूर्वापामार्गजातीभिःपरितुष्टःसदाशिवः ॥ आयुरारोग्यमैश्वर्यंनृणांदत्तेनसंशयः
॥४४॥ चैत्रशुक्लचतुर्दश्यामितरस्मिन्दिनेथवा॥ मल्लारिंस्वमतेनैवपूजयेत्सुमहोत्सवम् ॥४५॥
सयातिभोगानखिलान्परत्रेचपरांगतिम् ॥ अरिंदमयतेश्रीमानित्याहभगवाञ्छिवः ॥ ४६ ॥
पूजयेत्तंदुलैर्द्धूतैरजनीचूर्णरंजितैः ॥ मुखस्तंभंकरोत्येवशूद्राणांवादिनामसौ ॥ ४७ ॥ धूपंदी



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पंचनैवेद्यंखाद्यंपानंपशुंतथा ॥ तांबूलंचसकर्पूरंचंदनंमृगनाभिजम् ॥ ४८ ॥ वस्त्रालंकाररत्ना
निनार्यःकुसुममुत्तमम् ॥ अश्वंवित्तानुसारेणसुवर्णंचामरादिकम् ॥ ४९ ॥ गीतंवाद्यंप्रेक्षणीयंज
यघंटासमन्वितम् ॥ अन्यांश्चविविधान्भोगान्येर्पयंतिपरमेश्वरम् ॥५०॥ मल्लारौतेनराश्चाष्टभा
गान्यांतिकलौभुवि ॥ यद्यच्चितेचिन्तयंतिप्राप्नुवंत्यखिलंचतत् ॥ ५१ ॥ सर्वोपभोग्याकमलार
त्नालंकारयोषितः ॥ वाजिनःकुंजरास्तुंगामल्लारेःपूजनात्फलम् ॥ ५२ ॥ वसंतेकेलिलीलाभि
रुपचारैर्यथाविधि ॥ चैत्रशुक्लतृतीयादिमासमेकंमहोत्सवे ॥ ५३ ॥ पूजयन्म्हालसाकांतंमल्ला
रिंदेवभूपतिम् ॥ सुमुखाकामिनीहस्तचामरैर्वीजितःक्षितौ ॥ ५४ ॥ कंदर्पमूर्तिर्भवतिराजतु
ल्यप्रतापवान् ॥ सेवंतेसिद्धगंधर्वायक्षविद्याधरास्तथा ॥ ५५ ॥ रंभातिलोत्तमामुख्यास्तंकै
लासेनरोत्तमम् ॥ समल्लारिप्रसादेनशिवस्यानुचरोभवेत् ॥ ५६ ॥ आषाढेश्रावणेवापिपूजये
द्यःपवित्रकैः ॥ दिनमेकंतुचासाद्यपवित्रोजायतेनरः ॥ ५७ ॥ सप्तजन्मकृतंपापंविलयंयाति
तस्यवै ॥ लभतेपरमांभक्तिंश्रीमन्मल्लारिशासनात् ॥ ५८ ॥ महानवम्यांमल्लारेर्देव्याःप्रीतिपुरः



सरम् ॥ शृणोतिकलहंयस्तुकुरुतेपूजनंद्वयोः ॥ ५९ ॥ नारीणांप्रेमपात्रंस्यान्नारीतुसुभगाभ
वेत् ॥ मोक्षार्थीलभतेमोक्षमन्यथास्वर्गमाप्नुयात् ॥६०॥ मार्गादिदिवसान्यावदेकवृद्ध्याद्विजा
तिकान् ॥आषष्टिभोजयेद्विप्रान्बहून्वावैभवेच्छया ॥ लक्ष्मीस्तस्यकुलेगेहेसोल्लासंनंदतेध्रुवम् ॥
॥ ६१ ॥ यात्रांमल्लारिदेवस्यमार्गषष्ठ्यादिपर्वसु ॥ कुर्वंतितेषांयज्ञस्यस्युःफलानिपदेपदे ॥
॥६२॥ यद्वित्तंव्ययमाप्नोतिमार्गेतस्मिंस्तदक्षयम् ॥ सुधारूपेणलभतेपुमान्स्वर्गेनसंशयः ॥
॥६३॥ येमल्लारिंसमुद्दिश्यसुवर्णंगोतुरंगमान् ॥ वस्त्रालंकृतधान्यानिवित्तंरत्नानिशक्तितः ॥
॥६४॥ रवेर्दिनेप्रयच्छंतितेषांसन्निहितःशिवः ॥ यज्ञकोटिफलंपूर्णंजायतेनात्रसंशयः ॥६५॥
उपोष्यशनिवारंतुमल्लारिंपूजयंतिये ॥ पूर्णकामाःसलक्ष्मीकानराःसद्योभवंतिते ॥६६॥ विघ्ना
निनाशमायांतितेषांनृणांमहांतिच ॥ एकभुक्तंरवेर्वारेकदाचित्कुरुतेनरः ॥ ६७ ॥ मल्लारेःप्रि
यभक्तोसौलभतेसुमनोरथान् ॥ अन्नदानंप्रकुर्वंतिमल्लारिप्रीतयेनराः ॥ सिक्थमात्राणियावं
तितावद्वर्षाणिभुंजते ॥ ६८ ॥ पीयूषंनित्यसेवंतेस्वर्गेशक्रस्यसन्निधौ ॥ मल्लस्यहंतुःप्रीत्यैयेकुं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुमाक्षतपूर्वकम् ॥६९॥ तांबूलदानंकुर्वंतिदेवस्तेषांसमीपगः ॥ प्रांगणेपरमेशस्यहरिद्राचूर्ण
संभवाः ॥७०॥ पतंतिपांसवोभूमौयेषांपूजाविशेषतः ॥ यावंतोगगनोद्भूतास्तावद्वर्षशतानि
च ॥ ७१ ॥ प्राप्नुवंतिमहाभोगाञ्छिवलोकेसनातनान् ॥ इहलोकेपिविविधान्सर्वाश्चर्यक
राञ्छुभान् ॥ ७२ ॥ ह्यालसाकांतयोःपूजांयःकुर्यात्ससुखीभवेत् ॥ संदेहोनात्रकर्तव्योमल्लारे
र्वचनाद्ध्रुवम् ॥ ७३ ॥ इतिश्रीब्रह्मांडपुराणेक्षेत्रखंडेश्रीमल्लारिमाहात्म्येशिवपूजाविधिनिरू
पणंनामएकविंशतितमोऽध्यायः ॥ २१ ॥ ॥ श्रीमल्लारिरुवाच ॥ तस्मात्सर्वप्रयत्नेनम
यिभक्तिस्तुदुर्लभा ॥ लभ्यतेमानुषैःसातुनपूर्वसुकृतैर्विना ॥ १ ॥ येषांगृहेमदीयातुप्रतिमा
पूज्यतेसदा ॥ तेषांगृहेसदालक्ष्मीश्चिरवासाःसुरर्षयः ॥२॥ इदंमदीयंमाहात्म्यंपुस्तकंलिखि
तंगृहे ॥ तिष्ठतेतस्यमाहात्म्यंशृणुध्वंतद्द्विजोत्तमाः ॥ ३ ॥ तत्रनोग्रहभूतेशाडाकिन्योवनदे
वताः॥ पूतनाश्चमहामार्यःकृत्यारक्षःपिशाचकाः॥४॥प्रेतभैरवकूष्मांडास्तथैवोग्राश्चमातरः॥
आपदेशिकलोकाश्चतथाभूचरखेचराः ॥ ५ ॥ यक्षगंधर्वयक्षिण्यश्चेटकोपविषाणिच ॥ ये



चक्रुरग्रहाःसर्वेसहजाब्रह्मराक्षसाः ॥ ६ ॥ व्याघ्रसर्पभुजंगास्तुवह्निचोरादयोपिच ॥ येपूर्व
जन्मकलुषप्रभवारोगसंचयाः ॥७॥ उत्पाताश्चैवयेचान्येदुष्टभूतसमुद्भवाः ॥ नपीडांतत्रकुर्वंती
ममाज्ञानान्यथाभवेत् ॥ ८ ॥ गृहेतस्यमहालक्ष्मीःकल्पांतासंततिस्तथा ॥ किमत्रबहुनोक्तेन
तत्कुलंरक्ष्यतेमया ॥ ९ ॥ एतन्ममैतन्माहात्म्यंयःशृणोतिद्विजोत्तमाः ॥ यावदक्षरमर्यादाता
वत्स्वर्गेमहीयते ॥ १० ॥ एतत्पठतियोमर्त्यःसोश्वमेधफलंलभेत् ॥ यःश्रावयिष्यतिनरोमा
हात्म्यमिदमुत्तमम्॥ ११॥सोहमेवनसंदेहःपूज्योवस्त्रैश्चभूषणैः॥योस्याप्यक्षरमप्येकंशृणोत्यन्य
मुखादपि ॥ १२ ॥ सोचिरेणैवकालेनममयातिसलोकताम् ॥ एतन्ममैतन्माहात्म्यंयःपठेत्प्र
यतोनरः ॥ १३ ॥ सोचिरेणैवकालेनलभतेवांछितंफलम् ॥ अष्टम्यांचचतुर्दश्यांनवम्यांचवि-
धूदये ॥ १४ ॥ शिवरात्र्यांतथाचंपाषष्ठ्यांयःप्रयतोनरः ॥ पठतेशृणुतेवापितत्फलंप्रोच्यते
कथम्॥१५॥त्रिंशत्कोट्योपियेदेवास्त्वधिकायेऽपिसर्वशः॥ममशासनतःसर्वेतस्यकिंकरताभि
युः॥१६॥नानेनसदृशोयज्ञोनानेनसदृशोमनुः॥ नानेनसदृशंपुण्यंनानेनसदृशीगतिः॥१७॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बहुनात्रकिमुक्तेनजपयज्ञव्रतानिच ॥ तीर्थदानतपोधर्मदेवतायतनानिच ॥ १८ ॥
वापीकूपतडागानियेचान्येधर्मसंचयाः ॥ नार्हंतिश्रवणाच्चास्यसर्वेसाहस्रिकींतनूम् ॥ १९ ॥
दंभेनकपटेनापिबलाद्वापिप्रसंगतः ॥ यःशृणोतिजपेत्सोपिममवल्लभतामियात् ॥ २० ॥ नमे
प्रियस्तथास्वामीनमेलंबोदरःप्रियः ॥ नतथाप्रीयतेगौरीयथाश्रोतास्यमानवः ॥ २१ ॥ किं
तेनजातेनसुतेनसर्वथायोभक्तिमान्योमयिसर्वभावैः ॥ दहाम्यहंपातकराशिसंचयंमद्द्रोहकारी
नहिविंदतेसुखम् ॥ २२ ॥ अस्यस्तोत्रस्यमाहात्म्यंश्रुतस्यपठितस्यच ॥ शेषोप्यनंतवदनैर्वक्तुंपा
रंनयास्यति २३ ॥ दीर्घायुरत्रब्रह्मापिचतुर्वदनपंकजैः ॥ नवक्तुंपारमायातिमाहात्म्यश्रवण
स्यच ॥ २४ ॥ तस्मात्किमत्रबहुनायोमद्भक्तःसदानरः ॥ सोहमेवनसंदेहोममैतद्वचनंयथा
॥ २५ ॥ सनत्कुमार उवाच ॥ एवमुक्त्वातुमल्लारिस्तान्सर्वान्विसर्जच ॥ तेपिप्रहृष्टमनसःस्व
स्थानंचसमाययुः ॥ २६ ॥ अष्टाशीतिसहस्राणितस्मात्पूर्वंकलौयुगे ॥ पक्षपातेनविप्राणाम
गात्कैलासभूपतिः ॥ २७ ॥ सतत्रभुक्तिंमुक्तिंचकलौसिद्धिंप्रयच्छति ॥ तस्मात्कलौयुगेना



न्यःप्रभावोविद्यतेसुराः ॥२८॥ श्रीशिव उवाच ॥ एवमुक्त्वातुविप्रर्षिर्मल्लारिंमनसार्चयत् ॥
ऋषयोपिमहात्मानंतंप्रणम्यप्रतुष्टुवुः ॥ २९ ॥ ऋषय ऊचुः ॥ महर्षेदुःखपंकस्थावयमुद्धारि
तास्त्वया ॥ श्रुत्वामल्लारिमाहात्म्यंहर्षश्चेतसिजायते ॥ ३० ॥ ततोधिकोस्तिकोदेवोदेवदेवा
न्महेश्वरात् ॥ यस्यवेदानचत्वारोरूपंविंदंतितत्वतः ॥ ३१ ॥ अतःकलौयुगेघोरेभयंकस्या
स्तिनोमुने ॥ किंचात्रबहुनोक्तेनजीवदानंत्वयाकृतम् ॥ ३२ ॥ श्रीशिव उवाच ॥ एवंस्तुत्वा
महात्मानंतंविप्रंमुनिपुंगवाः ॥ स्वाश्रमानाययुःसर्वेजपयज्ञमहोत्सवाः ॥ ३३ ॥ तस्मात्पार्व
तितत्राहंकलौसिद्धिप्रदोनृणाम् ॥ तत्क्षेत्रंतीर्थमप्येकंभुक्तिमुक्तिफलप्रदम् ॥ ३४ ॥ अधिष्ठि
तंमयादेवित्वयाचकृपयानृणाम् ॥ येनकेनापिभावेनयद्यदिच्छंतिमानवाः ॥ ३५ ॥ तत्तत्स
र्वमवाप्नोतिनात्रकार्याविचारणा ॥ तस्मात्सर्वप्रकारेणसर्वभावेनसर्वदा ॥ ३६ ॥ अहमेवबुधैः
सेव्योनान्यःकश्चनविद्यते ॥ यदुह्यंपरमंदेविभक्त्यातववरानने ॥ ३७ ॥ प्रेम्णासंप्रोक्तमेत
स्मात्किमन्यच्छ्रोतुमिच्छसि ॥ कस्मिंश्चिच्चनदातव्यंश्रद्धाहीनेकदाचन ॥ ३८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ इति श्रीब्रह्मांडपुराणेक्षेत्रखंडेश्रीमल्लारिमाहात्म्येश्रीमल्लारिप्रसादवाक्यंनामद्वाविंशतितमोऽध्यायः ॥ २२ ॥ ॥ श्रीम्हालसापतिमार्तंडार्पणमस्तु ॥ ॥ ॥ ॥



॥ आरती मार्तंडाची ॥

जेजुरगडपर्वतशिवलिंगाकार ॥ मृत्युलोकींदुसरेंकैलासशिखर ॥ नानापरिचीरचनारचली अपार ॥ तयेस्थळींनांदेस्वामीशंकर ॥ जयदेवजयदेवजयशिवमार्तंडा ॥ अरिमर्दनमल्लारी तूंचीप्रचंडा ॥ जयदेवजयदेव० ॥ धृ० ॥ १ ॥ मणिमल्लदैत्यप्रबळतेझाले ॥ त्रिभुवनींत्यांनीं प्रळयमांडीले ॥ नाटोपतीकोणावरदेंमातले ॥ देवगणगंधर्वकांपतीत्यांला ॥ जय० ॥ २ ॥ चंपाषष्ठीदिवशींअवतारधरिसी ॥ मणिमल्लदैत्यांचासंहारकरिसी ॥ चरणींपृष्ठींखड्गेवर्मीं स्थापिसी ॥ अंतींवरदेदैत्यामुक्तिपैंदेसी ॥ जय० ॥ ३ ॥ मणिमल्लनामेंदैत्यमल्लारी ॥ देवांसंकटपडलेंराहेजेजोरी ॥ अर्धांगींम्हाळसाशोभेसुंदरी ॥ देवाठावमागेदासनरहरी ॥ जयदेवजय० ॥ अरिमर्द० ॥ ४ ॥



॥ आरती मल्लारीची ॥

पंचाननहयवाहनसुभूषितनीळा ॥ खंडामंडितदंडितदानविंअवलीळा ॥ मणिमल्लमर्दुनियांजोशिरींपिंवळा ॥ हीरेकंकणबासिंगेंसुमनांच्यामाळा ॥ १ ॥ जयदेवजयदेवजयशिवमल्लारी ॥ वारीदुर्जनवारीनिंदकअपहारी ॥ धृ० ॥ सुरवरसंवरवरदेमजलागींदेवा ॥ नानानामेंगाइनहीतुमचीसेवा ॥ अघटितगुणगावयावाटतसेहेवा ॥ फणिवरशिणलाकीतीनरपामरकेवा ॥ जय० ॥ २ ॥ रघुविरस्मरणींशंकरहृदयींनिवाला ॥ तोहामदनांतकअवतारझाला ॥ यालागींआवडींभावेंवर्णिला ॥ रामींरामदासाजिवलगभेटला ॥ जयदेवजयदेव० ॥ ३ ॥

मुद्रक व प्रकाशक : दत्तात्रय विश्वनाथ पाठक, जगदीश्वर प्रिंटिंग प्रेस, गिरगांव, गायवाडी, मुंबई ४
आवृत्ति ३ री [ सन १९६९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ इति मल्हारिमाहात्म्यं समाप्तम् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=05.09.19 16:23
,TRANSFERRED=2019/09/05 at 16:32:45
,PAGES=44
,TYPE=STD
,NAME=S0001663
,Book Name=M-428-MALHARI MAHATMAY
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection